ॐ

ऋग्ब्राह्मणारण्यकान्तर्गतद्वितीयारण्यकस्था

ऐतरेयोपनिषत्

अथ प्रथमोऽध्यायः

श्रीमच्छङ्करभगवत्पादाचार्यविरचितं भाष्यम्

उपोद्घातः

परिसमाप्तं कर्म सहापरब्रह्मविषयविज्ञानेन। सैषा कर्मणो ज्ञानसहितस्य परा गतिरुक्थविज्ञानद्वारेणोपसंहृता। "एतत्सत्यं ब्रह्म प्राणाख्यम्" "एष एको देवः" "एतस्यैव प्राणस्य सर्वे देवा विभूतयः" "एतस्य प्राणस्याऽऽत्मभावं

श्रीमदानन्दगिर्याचार्यकृता टीका

[1]आत्मा वा इदमित्यादिना केवलात्मविद्यारम्भस्यावसरं वक्तुं वृत्तं कीर्तयति—**परिसमाप्तमिति**। तत्परिसमाप्तिः कथं गम्यत इत्याशङ्क्य तत्फलोपसंहारादित्याह—**सैषेति**। परा गतिः परं गन्तव्यं प्राप्तव्यं फलमित्यर्थः। उपसंहारमेव वाक्योदाहरणेन दर्शयति—**एतदिति**। तत्र सह सर्वेण भोज्येन संयुक्तोऽध्यात्माधिदैवलक्षणः प्राणः सत्यैकशब्दवाच्यो भवतीति प्राणस्वरूपमनेन वाक्येनोपसंहृतमित्यर्थः। अनेन प्राण एक एवेत्युक्तमित्याह—**एष इति**। तर्हि वागग्न्यादयो देवाः क इत्याशङ्क्य "[2]तस्य वाक्तन्तिरथातो विभूतयोऽस्य पुरुषस्य" इत्यादिना प्राणस्यैव विभूतयो विस्तारा इत्युक्तमित्याह—**एतस्यैवेति**। एवं सर्वात्मकप्राणस्याऽऽत्मत्वेन विज्ञानात्कर्मसहितात्सर्वदेवतात्मकप्राणप्राप्तिलक्षणं फलं "प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयः सम्भूय देवता अप्येति य एवं वेद" इत्यनेन वाक्येनोपसंहृतमित्याह—**एतस्येति**। तथा च ज्ञानसहितेन कर्मणा केवलात्मस्वरूपावस्थानलक्षणमोक्षस्य

---

१. धर्मकोशग्रन्थमालायां "वायौ" इति प्रसिद्धक्षेत्रस्य विद्यालयमुद्रितायामेतरेयोपनिषदमधिकृत्य तत्सम्पादकैः **श्रीलक्ष्मणशास्त्रिजोशीत्येतैः** टिप्पण्यामुच्यते—ऐतरेयोपनिषत् न केवलम् "आ मा वा" इत्यारभ्य "अमृतः समभवत्" इत्येदन्ता परन्तु ऐतरेयारण्यकस्थद्वितीयतृतीयारण्यकावपि उपनिषत्त्वेन सग्राह्यौ। व्याख्यातौ च श्रीशङ्करभगवत्पादैः "तथा च एष पन्था एतत्कर्म एतत्सत्यम्" इत्यारभ्यैवोपनिषत्प्रारभ्यते इत्युक्तम्।

परन्तु विविच्यमाने "आत्मा वा" इत्यारभ्यैव भगवत्पादैः व्याख्याता इत्यकामेनाङ्गीकर्तव्यं भवति यतः—"तस्यास्यकर्मकाण्डेन सम्बन्धोऽभिधीयते" इत्यारभ्य "ब्रह्मविद्याप्रतिप्रत्यर्था उपनिषदारभ्यते" इत्यन्तं बृहदारण्यकोपनिषद्भाष्यादौ स्थितम्। न हि तदेवात्राप्युक्तं तैरिति युज्यते उपनिषद्भेदेन भिन्नभिन्नरीत्यैवोपोद्घातरचनादर्शनात्।

अपि च आनन्दाश्रममुद्रिते ऐतरेयभाष्ये स्थितः "कथं पुनरकर्मसम्बन्धिकेवलात्मविज्ञानविधानार्थमुत्तरो ग्रन्थ इति गम्यते" इत्यारभ्य "अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्शनार्थमुत्तरो ग्रन्थ आरभ्यते" इत्येदन्तः "आत्मा वा" इत्यतः पूर्वमुपलभ्यमानः ग्रन्थभागः धर्मकोषसम्पादितपुस्तके दूरनिरस्त एव। न चायं भागः अप्रामाणिक इति शङ्क्यम्। श्रीमदानन्दगिर्याचार्यैर्व्याख्यातत्वात्। अपि च "त्रय आत्मानः" इत्यारभ्य "यावदयम्" इत्यादिवाक्यात् पूर्वभावि सर्वं भाष्यं त्रिचतुरपुटपरिमितमानन्दगिरिटीकोपष्टब्धं त्यक्तमेवानेन महाभागेन। तस्मात् धर्मकोशस्थभाष्यमसम्पूर्णमेवेति निर्णीयास्माभिः आनन्दाश्रमपाठः भारते सर्वत्र प्रसिद्ध एव स्वीकृतः।

२. तस्य वाक्तन्तिः प्रसारितरज्जुवत् सर्वसामान्या वाक् सा दीर्घरज्जुस्थानीया। प्रत्येकपशुबन्धनपाशवत् नामानि दामस्थानीयानि। तया वाचा सर्वं जगत् सितम्=बद्धम्।

गच्छन्देवता अप्येति" इत्युक्तम् । सोऽयं देवताप्ययलक्षणः परः पुरुषार्थः । एष मोक्षः । स चायं यथोक्तेन ज्ञानकर्मसमुच्चयसाधनेन प्राप्तव्यो नातः परमस्तीत्येके प्रतिपन्नास्तान्निराचिकीर्षुरुत्तरं केवलात्मज्ञानविधानार्थं "आत्मा वा इदमि"त्याद्याह। कथं पुनरकर्मसम्बन्धिकेवलात्मविज्ञानविधानार्थ उत्तरो ग्रन्थ इति गम्यते? अन्यार्थानवगमात्। तथा च पूर्वोक्तानां देवतानामग्न्यादीनां संसारित्वं दर्शयिष्यत्यशनायादिदोषवत्त्वेन "तमशनापिपासाभ्यामन्ववार्जदि"त्यादिना। अशनायादिमत्सर्वं संसार एव परस्य तु ब्रह्मणोऽशनायाद्यत्ययश्रुतेः । भवत्वेवं केवलात्मज्ञानं मोक्षसाधनं;

असिद्धेस्तत्सिद्धयर्थं केवलात्मविद्यारम्भस्येदानीमवसर इति भावः। अत्रान्तरे सर्वात्मकसूत्रात्मप्राप्तिव्यतिरिक्तमोक्षस्याभावात्तदर्थं केवलात्मविद्यारम्भो न युक्त इति केषाञ्चिन्मतमुत्थापयति—**सोऽयमिति** । एतस्यैव विषयादिमतः सुखरूपत्वेन पुरुषार्थत्वान्मोक्षत्वं न निर्विषयस्य केवलात्मस्वरूपावस्थानस्येत्याह—**एष इति** । अयमपि चेन्मोक्षः केवलात्मज्ञानेन साध्यते तदा तदारम्भोऽर्थवानित्याशङ्क्य सविशेषणैव साधनेन सिद्धिर्युक्तेत्याह—**स चेति** । आत्मनः सविशेषत्वेन केवलात्मविद्याया अभावादपि न तस्या हेतुत्वमित्याह—**नातः परमिति** । तन्मतं प्रदर्श्य तन्निराकरणार्थत्वेन केवलात्मविद्यावाक्यमवतारयति—**तानिति** । केवलात्मज्ञानेति निर्विशेषात्मविषयत्वमकर्मनिष्ठत्वं कर्मानङ्गत्वलक्षणं कर्मासम्बन्धित्वं च कैवल्यमिह विवक्षितमित्यर्थः ।

ननु "आत्मा वा इदम्" इत्यादि कथं केवलात्मविषयं "स इमाँल्लोकानसृजत" इति लोकसृष्टिप्रतीतेः । तस्याश्च सविशेषहिरण्यगर्भादिकर्तृकत्वेन **पुराणेषु** प्रसिद्धेः । ताभ्यो गामानयदित्यादिव्यवहाराणां लोके सविशेषविषयत्वप्रसिद्धेः । पूर्वत्र "अथातो रेतसः सृष्टिः" "प्रजापते रेतो देवाः" इत्यत्र प्रजापतिशब्दितस्य हिरण्यगर्भस्य प्रस्तुतत्वाच्च तस्य तद्विषयत्वस्यौचित्यादित्यात्मगृहीतिरितरवदधिकरणपूर्वपक्षन्यायेन शङ्कते—**कथमिति** । सविशेषविषयत्वे सत्यात्मविद्यायाः कर्मासम्बन्धोऽप्यसिद्ध इत्यभिप्रेत्योक्तम**कर्मसम्बन्धीति** । "[२]आत्मा वा इदमेक एवाग्र आसीत्" इत्यद्वितीयात्मोपक्रमात् । "एष ब्रह्मैष इन्द्रः" इत्याद्यनुक्रम्य "सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम्" इति प्रज्ञानशब्दितप्रत्यगात्माधिष्ठानत्वेन तद्व्यतिरेकेण ब्रह्मशब्दितहिरण्यगर्भादिप्रपञ्चस्याभावमुक्त्वा प्रज्ञानं ब्रह्मेत्यद्वितीयात्मनोपसंहारात् "स एतमेव पुरुषं ब्रह्म ततमपश्यत्" इति मध्ये परामर्शाद्ब्रह्मात्माद्वितीयत्वस्य मानान्तरागम्यत्वेनापूर्ववादमुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवदिति स्वर्गशब्दितनिरतिशयसुखात्मकब्रह्मैक्येन स्थितस्य तदंशभूतवैषयिकसर्वानन्दप्राप्तिलक्षणफलोक्तेः । सृष्ट्याद्यर्थवादात् । "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इति प्रवेशोक्तेः । "तस्य त्रय आवसथास्त्रयः स्वप्नाः" इति जाग्रदाद्यवस्थात्रयस्य स्वप्नत्वेन मिथ्यात्वोक्त्युपपत्तेश्च निर्विशेषाद्वितीयात्मपरत्वावगमनेन ग्रन्थस्यार्थान्तरशङ्कानवकाशाल्लोकादिसृष्ट्युक्तेश्चाध्यारोपापवादाभ्यामुक्तात्मप्रतिपत्त्यर्थमात्मन्यध्यारोपात्परमात्मैवेहाऽऽत्मशब्देन गृह्यत इतरवत् । यथेतरेषु सृष्टिश्रवणेषु "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्येवमादिषु परस्याऽऽत्मनो ग्रहणं यथा वेतरस्मिँल्लौकिक आत्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते तथेहापि भवितुमर्हति । कुतः । वाक्यार्थदर्शनात् । आत्मगृहीतिरितरवदुत्तरादित्यधिकरणसिद्धान्तन्यायेन केवलात्मपरत्वनिश्चयान्न सविशेषपरत्वमुत्तरग्रन्थस्येत्याह—**अन्यार्थेति** । यच्चैष एव मोक्ष इत्युक्तं तत्राऽऽह—**तथा चेति** । तथा संसारित्वं च दर्शयिष्यतीत्यन्वयः । तं हिरण्यगर्भस्य स्थूलं रूपं वैराजं पिण्डमशनायापिपासाभ्यां संयोजितवानीश्वर इति श्रुत्यर्थः । आशनायादिमत्त्वेऽपि निरतिशयसुखवत्त्वेन देवताभावस्य मोक्षत्वं स्यादित्यत आह—**अशनायाद्येति**। अशनायादेर्दुःखनियतत्वान्निरतिशयसुखवत्त्वं तस्यासिद्धमिति संसारित्वमित्यर्थः । यच्च निर्विशेषात्मस्वरूपावस्थानस्य विषयादिरहितत्वेन न मोक्षत्वमिति तदसत् । तस्य योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्यशनायाद्यत्ययश्रुतेस्तन्नियतदुःखाप्रसक्तेः । स्वतश्च "आनन्दो ब्रह्मेति व्यजानात्" इति श्रुत्यन्तरादमुष्मिन्स्वर्गे लोक इतीहाप्यानन्दरूपतावगमात्स्वर्गशब्दस्य

---

१. आत्मगृहीतिरितरवदुत्तरात् (ब्र० सू० ३-३-१६)।

२. "आत्मा वा इदमग्र आसीदि"त्यनेन हिरण्यगर्भं इह प्रतिपद्यते न शुद्धं ब्रह्म लोकसृष्टिसमाम्नानात् तत्सृष्टेः प्रजापतिकर्तृकत्वात् इति पूर्वपक्षः तन्न्यायेनेत्यर्थः । ऐतरेयकस्य शुद्धब्रह्मतात्पर्यकत्वे षड्विधतात्पर्यलिङ्गान्याह—आत्मा वेति । आत्मगृहीत्यधिकरणसिद्धान्तन्यायः—उक्ततात्पर्यलिङ्गवत्त्वं च निर्गुण एव न सविशेषे ।

न त्वत्राकर्म्येवाधिक्रियते । विशेषाश्रवणात् । अकर्मिण आश्रम्यन्तरस्येहाश्रवणात् । कर्म च बृहतीसहस्रलक्षणं प्रस्तुत्य अनन्तरमेवाऽऽत्मज्ञानं प्रारभ्यते । तस्मात्कर्म्येवाधिक्रियते ।

न च कर्मासम्बन्ध्यात्मविज्ञानं पूर्ववदन्त उपसंहारात् । यथा कर्मसम्बन्धिनः पुरुषस्य सूर्यात्मनः स्थावर-जङ्गमादिसर्वप्राण्यात्मत्वमुक्तं ब्राह्मणेन मन्त्रेण च "सूर्य आत्मे"त्यादिना, तथैव "एष ब्रह्मैष इन्द्रः" इत्याद्युपक्रम्य सर्वप्राण्यात्मत्वम् । "यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रमि"त्युपसंहरिष्यति । तथा च संहितोपनिषदि—"एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते" इत्यादिना कर्मसम्बन्धित्वमुक्त्वा "सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते" इत्युपसंहरति । तथा तस्यैव "योऽयमशरीरः प्रज्ञात्मे"त्युक्तस्य "यश्चासावादित्य एकमेव तदिति विद्यादि"त्येकत्वमुक्तम् । इहापि "कोऽयमात्मे"त्युपक्रम्य प्रज्ञात्मत्वमेव "प्रज्ञानं ब्रह्मे"ति दर्शयिष्यति । तस्मान्नाकर्मसम्बन्ध्यात्मज्ञानम् ।

पुनरुक्त्यानर्थक्यमिति चेत् कथं "प्राणो वा अहमस्म्यृषे" इत्यादिब्राह्मणेन "सूर्य आत्मा" इति मन्त्रेण च निर्धारितस्याऽऽत्मन "आत्मा वा इदम्" इत्यादिब्राह्मणेन "कोऽयमात्मे"ति प्रश्नपूर्वकं पुनर्निर्धारणं पुनरुक्तमनर्थकमिति चेत्, न । तस्यैव धर्मान्तरविशेषनिर्धारणार्थत्वान्न पुनरुक्तादोषः । कथम्, तस्यैव कर्मसम्बन्धिनो जगत्सृष्टिस्थिति-संहारादिधर्मविशेषनिर्धारणार्थत्वात् । केवलोपास्त्यर्थत्वाद्वा । अथवाऽऽत्मेत्यादिपरो ग्रन्थसन्दर्भ आत्मनः कर्मिणः कर्मणोऽन्यत्रोपासनाप्राप्तौ कर्मप्रस्तावेऽविहितत्वात्केवलोप्यात्मोपास्य इत्येवमर्थः । भेदाभेदोपास्यत्वाद्वैक एवाऽऽत्मा कर्मविषये भेददृष्टिभाक् । स एवाकर्मकालेऽभेदेनाप्युपास्य इत्येवमपुनरुक्तता ।

सुखसामान्यवाचित्वात् । "अनन्ते स्वर्गे लोके" "ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः" इत्यादिश्रुतिषु ब्रह्मानन्दे स्वर्गशब्दप्रयोगाच्च । तस्य विषयाभावेऽपि पुरुषार्थत्वान्मोक्षत्वमित्याह—**परस्य त्विति** । एवं निर्विशेषात्मविद्याया मोक्षसाधनत्वमङ्गीकृत्य तस्या अकर्मिनिष्ठत्वनियमरूपं कैवल्यं न सम्भवतीति वदन्संन्यासमाक्षिपति—**भवत्विति** । विशेषाश्रवणमेव स्फोटयति—**अकर्मिण इति** । संन्यासिन इत्यर्थः । न केवलं विशेषाश्रवणं किन्तु सन्निधानात्कर्मिणः प्रतीतेः कर्मसम्बन्धित्वनियमश्रवणं चास्तीत्याह—**कर्म चेति** । तथा च तद्द्वारा कर्मी सन्निहित इत्यर्थः । **तस्मादिति** । ततो न कर्मत्यागरूपसंन्यासाश्रमोऽस्तीत्यर्थः ।

एवमात्मविद्यां केवलां कर्मासम्बन्धिनीमङ्गीकृत्य तस्या अकर्मिनिष्ठत्वनियमो निराकृतः । इदानीमङ्गीकारं परित्यजति—**न चेति** । पूर्वत्र कर्मसम्बन्धिज्ञानविषयस्य सर्वात्मत्वोक्तेरेष ब्रह्मेत्यादिनाऽत्रापि सर्वात्मत्वोक्तेस्तेनैव लिङ्गेनास्याप्यात्मज्ञानस्य कर्मसम्बन्धित्वानुमानाद्वक्ष्यमाणस्याऽऽत्मज्ञानस्य न कर्मासम्बन्धित्वमित्यर्थः । संग्रहवाक्यं विवृणोति—**यथेत्यादिना । कर्मसम्बन्धिन इति** । तस्य "एष ह्येमं लोकमभ्यार्चत् पुरुषरूपेण य एष तपति" इत्यादिना सूर्यात्मत्वमुक्त्वा तस्य सर्वात्मत्वं "तस्माच्छर्तार्चिन इत्याचक्षत एतमेव सन्तम्" इत्यादिना "प्राणऋच इत्येवं विद्यात्" इत्यन्तेन "प्राणो वै सर्वाणि भूतानि च" इत्यनेन चोक्तमित्यर्थः । जगतो जङ्गमस्य तस्थुषः स्थावरस्य सूर्य आत्मेति मन्त्रार्थः । **प्रज्ञानेत्रमिति** । प्रज्ञाशब्दितब्रह्मनेतृकमित्यर्थः । [1]सन्दंशन्यायेनाप्यस्य कर्म-सम्बन्ध्यात्मविषयत्वमिति वदन्सर्वात्मत्वलिङ्गस्य कर्मसम्बन्ध्यात्मनियतत्वमाह—**तथा चेति** । तथा **संहितोपनिषदि** चेति चकारान्वयः । महत्युक्थे बृहतीसहस्राख्ये शस्त्र एतं प्रकृतमात्मानमृग्वेदिनो विचारयन्तीति श्रुत्यर्थः । **संहितोपनिषदि** प्रज्ञात्मेत्युक्तस्याऽऽत्मनो "यो यज्ञस्योल्बणं पश्येदि"त्यादिवाक्यपर्यालोचनया कर्मसम्बन्धप्रतीतेरस्यापि प्रज्ञात्मत्वोक्त्या च कर्मसम्बधावगमात्तज्ज्ञानस्य कर्मसम्बन्धित्वमित्याह—**तथा तस्येति**। शङ्कामुपसंहरति—**तस्मादिति**।

शङ्कावाद्येव सिद्धान्त्याशङ्कामाशङ्कते—**पुनरुक्तीति** । संग्रहवाक्यं विवृणोति—**प्राणो वा इत्यादिना** । पूर्वोत्तरब्राह्मणयोरेकार्थत्वे वक्ष्यमाणमपि प्राणात्मविषयं स्यात्तच्च निर्धारितमिति पुनरुक्तमित्यर्थः । स एवाऽऽशङ्कां परिहरति—**न तस्येति** । तमेव प्रश्नपूर्वकं विवृणोति—**कथमित्यादिना । जगत्सृष्टीति** । "स इमाँल्लोकानसृजत" इत्यादिश्रवणादित्यर्थः । प्रकारान्तरेण पुनरुक्तिं परिहरति—**केवलेति** । एतं परिहारं वाशब्दार्थं वदन्विवृणोति—**अथवेति । कर्मणोऽन्यत्रेति** । कर्माङ्गत्वं तदङ्गोक्थाद्याश्रयत्वं च विनेत्यर्थः । अप्राप्ताविति च्छेदः । अप्राप्तौ हेतुमाह—**कर्मप्रस्ताव इति** । अविहितत्वादिति च्छेद उत्तरत्र हेतुः । न चैवं स्वोक्तकर्मसम्बन्धित्वनियमत्यागापत्तिः।

---

१. सन्दंशन्यायेन—एकाङ्गानुवादेन विधीयमानयोः द्वयोरन्तरालपतित्वं सन्दंशः तेन अभिक्रमणादीनां प्रयाजाङ्गत्वसिद्धिः ।

"विद्यां चाविद्यां च यस्तद्वेदोभयँ सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽऽमृतमश्नुते ॥" इति । "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः" इति च वाजिनाम् । न च वर्षशतात्परमायुर्मर्त्यानाम् । येन कर्मपरित्यागेनात्मानमुपासीत । दर्शितं च "तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति" इति । वर्षशतं चाऽऽयुः कर्मणैव व्याप्तम् । दर्शितश्च मन्त्रः "कुर्वन्नेवेह कर्माणि" इत्यादिः । तथा "यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इत्याद्याश्च । "तं यज्ञपात्रैर्दहन्ति" इति च । [1]ऋणत्रयश्रुतेश्च । तत्र पारिव्राज्यादिशास्त्रं "व्युत्थायाथ भिक्षाचर्यं चरन्ती"त्यात्मज्ञानस्तुतिपरोऽर्थवादोऽनधिकृतार्थो वा ।

न । परमार्थविज्ञाने फलादर्शने क्रियानुपपत्तेः । यदुक्तं "कर्मिण एव चाऽऽत्मज्ञानं कर्मसम्बन्धि च" इत्यादि । तन्न । परं ह्याप्तकामं सर्वसंसारदोषवर्जितं ब्रह्माहमस्मीत्यात्मत्वेन विज्ञाने कृतेन कर्तव्येन वा प्रयोजनमात्मनोऽपश्यतः फलादर्शने क्रिया नोपपद्यते । फलादर्शनेऽपि नियुक्तत्वात्करोतीति चेत् । न । नियोगाविषयात्मदर्शनादिष्टयोगमनिष्टवियोगं

कर्माङ्गाश्रितत्वमात्रस्य त्यागेऽपि कर्मसम्बन्धित्वस्य सविशेषविषयत्वलक्षणस्य कर्मसमुच्चिततत्वलक्षणस्य वाऽत्यागादङ्गीकारवादेनास्य पक्षस्योक्तेर्वाऽस्मिन्नपि पक्षे कर्मिनिष्ठत्वं नियतमिति भावः । अत्रैव पक्षे विशेषान्तरमाह—**भेदेति । भेददृष्टीति** । इदन्तयोपास्य इत्यर्थः । **अभेदेनेति** । अहन्तयेत्यर्थः ।

आत्मा वा इदमित्यादिषट्कस्य स्वपक्षेऽर्थवत्त्वमुक्त्वा तस्य कर्मत्यागेनाऽऽत्मज्ञानार्थत्वपक्षे बहुश्रुतिविरोधमाह—**विद्यामित्यादिना**। अविद्याशब्देनात्र तत्कार्यं कर्मोच्यते। ननु "कुर्वन्नेवे"ति मन्त्रे वर्षशतस्य कर्मनियतत्वोक्तावपि तदनन्तरं संन्यासः स्यादित्यत आह—**न चेति** । 'शतायुर्वै पुरुषः" इति श्रुतेरित्यर्थः । इहापि बृहतीसहस्राख्यस्य शस्त्रस्य षट्त्रिंशतमक्षराणां सहस्राणीत्युक्त्वा तावन्ति पुरुषायुषोऽह्नां सहस्राणीत्युक्त्वाद्वत्सरशतमेवाऽऽयुरित्याह—**दर्शितं चेति** । भवन्तीत्यनन्तरमितिशब्दो द्रष्टव्यः । पुरुषायुषस्याह्नामिति पाठः साधुः । पुरुषायुषोऽह्नामिति तु समासान्तविधेरनित्यत्वाभिप्रायेण कथञ्चिन्नेयः । पुरुषायुष चेद्वर्षशताधिकं नास्ति तर्हि तन्मध्य एव कर्मसंन्यासः स्यादत आह—**वर्षशतं चेति** । तत्र मानमाह—**दर्शितश्चेति** । ननु **पुराणेषु** शताधिकस्याऽऽयुषो **दशरथादेः** श्रुतत्वाच्छतवर्षानन्तरं कर्मसंन्यासः स्यादित्याशङ्क्य शतायुः श्रुतिविरोधेन तस्यार्थवादत्वात्तथाऽङ्गीकारेऽपि जीवनकालस्य सर्वस्यापि कर्मणा व्याप्तत्वश्रुतेर्नैवमित्याह—**तथा यावज्जीवमिति** । "जीर्णो वा विरमेदि"ति वचनाज्जरानन्तरं संन्यासः स्यादित्याशङ्क्य यज्ञपात्रैर्दहनविधानान्नेत्याह—**तं यज्ञपात्रैरिति** । ननु यावज्जीवादिवाक्यानां प्रतिपन्नगार्हस्थ्यविषयत्वं वक्तव्यम् । अन्यथा ब्रह्मचारिणोऽपि तद्विधिप्रसङ्गात्ततश्च गार्हस्थ्यात्पूर्वं कर्मत्यागः स्यादत आह—**ऋणेति** । "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते" इति श्रुतेः । "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्" इति **स्मृतेश्चेत्यर्थः** । **ततश्च** तदपाकरणार्थं तेनापि गार्हस्थ्यमेव प्रतिपत्तव्यं न सन्यास इत्यर्थः ।

"यदहरेव विरजेत्तदहरेव प्रव्रजेत्" "व्युत्थायाथ भिक्षाचर्यं चरन्ति" "ब्राह्मणः प्रव्रजेद्गृहात्" इत्यादिश्रुतिस्मृत्योः का गतिरित्यत आह—**तत्रेति । ज्ञानस्तुतीति** । सर्वसन्यासेनाप्यात्मा ज्ञातव्य इति ज्ञानस्तुतिः प्रतीयत इति तत्पर इत्यर्थः । विविदिषेऽपि कर्मानधिकृतान्धपङ्ग्वादिविषयत्वमेवेत्याह—**अनधिकृतेति** । तस्मान्नाकर्मिनिष्ठा विद्या किंतु कर्मिनिष्ठा तत्सम्बन्धिनी चेति स्थितम् । तदेतत्सिद्धान्ती परिहरति—**नेति** । एवं हि कर्मिनिष्ठा विद्या स्यात् । यदि विदुषोऽपि कर्मानुष्ठानं स्यात्तदपि प्रयोजनार्थितया वा स्यात्काम्य इव नियोगबलाद्वा [2]**प्राभाकरमत** इव नित्यकर्माणि । तत्र नाऽऽद्य इत्याह—**परमार्थेति** । संग्रहवाक्यं विवृण्वन्निषेध्याध्याहारपूर्वकं नञर्थं विवृणाति—**यदुक्तमित्यादिना । कर्मसम्बन्ध चेति** । कर्माङ्गोक्त्याद्याश्रयमित्यर्थः । परमार्थेति वाक्यांशं विवृणोति—**परमिति** । अर्थप्राप्त्यर्थमनर्थनिवृत्त्यर्थं वा कर्म स्यान्नोभयमपीति वक्तुं विशेषणद्वयम् । दोषपदेन रागद्वेषाभावेनापि प्रवृत्त्यभावं सूचयति । प्रागनुष्ठितकर्मणाऽप्यसम्बन्धे कर्तव्येन दूरापास्त इति वक्तुं कृतेनेत्युक्तम् । द्वितीयं शङ्कते—**फलादर्शनेऽपीति** । ममेदं कार्यमिति बोद्धा हि नियोगस्य विषयो नियोज्यः । कार्ये स्वकीयत्वज्ञानं च तज्जन्यफलार्थिनो न

---

१. ऋणत्रयश्रुतिः—"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इत्युक्ता ।

२. प्राभाकरमत इवेति । नित्यानां फलं नास्ति तथापि "यावज्जीवमग्निहोत्रं जुहुयादि"त्यादिनियोगबलात् अकरणे प्रत्यवायः करणे पण्डापूर्वं जायते ननु फलमिति प्राभाकरमतम् ।

चाऽऽत्मनः प्रयोजनं पश्यंस्तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके न तु तद्विपरीतनियोगाविषय-ब्रह्मात्मत्वदर्शी। ब्रह्मात्मत्वदर्श्यपि संश्चेन्नियुज्येत नियोगाविषयोऽपि सन्न कश्चिन्न नियुक्त इति सर्वं कर्म सर्वेण सर्वदा कर्तव्यं प्राप्नोति। तच्चानिष्टम्। न च स नियोक्तुं शक्यते केनचित्।

आम्नायस्यापि तत्प्रभवत्वात्। न हि स्वविज्ञानोत्थेन वचसा स्वयं नियुज्यते नापि बहुवित्स्वाम्यविवेकिना भृत्येन। आम्नायस्य नित्यत्वे सति स्वातन्त्र्यात्सर्वान्प्रति नियोक्तृत्वसामर्थ्यमिति चेत्, न। उक्तदोषात्। तथाऽपि सर्वेण सर्वदा सर्वमविशिष्टं कर्म कर्तव्यमित्युक्तो दोषोऽप्यपरिहार्य एव। तदपि शास्त्रेणैव विधीयत इति चेत्। यथा कर्मकर्तव्यता शास्त्रेण कृता तथा तदप्यात्मज्ञानं तस्यैव कर्मिणः शास्त्रेण विधीयत इति चेन्न। विरुद्धार्थबोध-कत्वानुपपत्तेः। न ह्येकस्मिन्कृताकृतासम्बन्धित्वं तद्विपरीतत्वं च बोधयितुं शक्यम्। शीतोष्णतामिवाग्नेः। न चेष्टयोगचिकीर्षाऽऽत्मनोऽनिष्टवियोगचिकीर्षा च शास्त्रकृता सर्वप्राणिनां तद्दर्शनाच्छास्त्रकृतं चेत्तदुभयं गोपालादीनां न दृश्येताशास्त्रज्ञत्वात्तेषाम्। यद्धि स्वतोऽप्राप्तं तच्छास्त्रेण बोधयितव्यम्। तच्चेत्कृतकर्तव्यता-विरोध्यात्मज्ञानं शास्त्रेण कृतं कथं तद्विरुद्धां कर्तव्यतां पुनरुत्पादयेच्छीतताभिवाग्नौ तम इव च भानौ। न बोधयत्येवेति चेत्, न। "स म आत्मेति विद्यात्" "प्रज्ञानं ब्रह्मे"ति चोपसंहारात्। "तदात्मानमेवावेत्तत्त्व-

चाऽऽत्मनोऽसङ्गित्वज्ञानिनो ममेदमिति बुद्धिर्भवति। अतो न तस्य नियुक्तत्वमित्याह—**न नियोगेति**। तदेवोपपादयति—**इष्टेति**। ममेदं कार्यमिति बोधाभावेऽपि चेन्नियुज्येत तर्हि राजसूयादिकं ब्रह्मणादिना कर्तव्यं स्यादग्निष्टोमादिकं च सर्वदा कर्तव्यं स्यान्निर्निमित्तत्वाविशेषादित्याह—**ब्रह्मात्मत्वेति। न कश्चिन्न नियुक्त इति**। नञ्द्वयेन सर्वोऽपि नियुक्त एवेत्यर्थः। किञ्च नियोक्ताऽप्यस्य किं यः कश्चन पुरुषो वेदो वा? आद्ये विदुष ईश्वरात्मत्वज्ञानात्सर्वनियोक्तृत्वेन स्वनियोज्येनान्येनास्य नियोज्यत्वं स्यात्तच्च विरोधान्न सम्भवतीत्याह—**न च स इति**। तस्यैव सर्वनियोक्तृत्वादित्यर्थः।

नन्वन्यस्य नियोज्यत्वाभावेऽप्याम्नायेन विद्वान्नियोज्यः स्यादिति द्वितीयमाशङ्क्य तस्याऽऽम्नायस्येश्वरता-मापन्नस्य स्वविज्ञानपूर्वकत्वात्स्ववचनेन स्वस्य नियोज्यत्वमेकत्र कर्मकर्तृत्वविरोधान्न सम्भवतीत्याह—**आम्नायस्या-पीति**। किञ्च व्याकरणादेस्तत्कर्तृपाणिन्यादिज्ञेयैकदेशार्थविषयत्वदर्शनेन वेदस्यापीश्वरजन्यस्येश्वरज्ञेयैकदेशविषयत्वेन अल्पज्ञत्वादप्यधिकज्ञेश्वरनियोक्तृत्वमयुक्तमित्याह—**नापि बहुविदिति**। अविवेकिनेत्यल्पज्ञेनेत्यर्थः। अचेतनत्वाद्वा तस्याविवेकित्वम्। भृत्येन न नियुज्यत इत्यनुषङ्गः। ननु वेदस्येश्वरज्ञानपूर्वकत्वपक्षे पूर्वोक्तदोषानुषङ्गेऽपि तस्य नित्यत्वपक्षे नायं दोष इति शङ्कते—**आम्नायस्येति**। तस्याचेतनस्य नियोक्तृत्वं न सम्भवति तस्य चेतन-धर्मत्वादित्युत्तरमाह—**नेति**। नियोक्तृत्वमभ्युपेत्यापि दोषमाह—**उक्तदोषादिति**। तदेव विवृणोति—**तथाऽपीति**। अनियोज्यस्यापि चेत्कर्तव्यं विदुषस्तर्हि सर्वं शिष्टं विहितं सर्वेणापि कर्तव्यम्। सङ्कोचे हेत्वभावादित्यर्थः। असङ्गिब्रह्मात्मत्वज्ञानस्य कर्मकर्तव्यतायाश्च शास्त्रेण कृतत्वादुभयोरपि शास्त्रयोः प्रामाण्याविशेषात्कदाचिदात्मज्ञानं कदाचित्कर्मानुष्ठानं च स्यादिति शङ्कते—**तदपीति**। तदेव विवृणोति—**यथेति**। स्वाभाविकाकर्त्रात्मबोधेन सकृदुत्पन्नेनैव कर्तृताबोधबाधनान्न पुनः शास्त्रेण कर्तृत्वबोधः सम्भवतीत्याह—**नेति**। कृताकृतेत्यत्र कृतमिदानीम-कृतमितः परं कर्तव्यं यत्तदुच्यते।

एवं तावन्नियोगाविषयाकर्त्रात्मदर्शित्वाद्विदुषः प्रयोजनार्थित्वाभावाच्च विदुषो न कर्मेत्युक्तम्। इदानीं स्वत इष्टानिष्टसंयोगवियोगरूपप्रयोजनार्थिताभावेऽपि विदुषः "स्वर्गकामो यजेते"ति शास्त्रेणैव साऽप्याधीयत इत्याशङ्क्य स्वभावतः प्राप्तप्रयोजनार्थितानुवादेन तदुपायमात्रं शास्त्रेण बोध्यते न तु साऽप्याधीयते। अन्यथाऽशास्त्रज्ञानां तदर्थिता न स्यादित्याह—**न चेष्टेति**। अत्र चिकीर्षाशब्देन फलेच्छामात्रमुच्यते न तु कर्तुमिच्छा फले तदयोगादिति। ननु कृताकृतासम्बन्धित्वं तद्विपरीतत्वं च विरुद्धत्वान्न बोधयति चेच्छास्त्रं तर्हि कृताकृतासम्बन्धित्वमेव मा बोधीत्याशङ्क्य तस्य मानान्तरासिद्धत्वेनावश्यं शास्त्रबोध्यत्वे वक्तव्ये तद्विपरीतस्य मानान्तरसिद्धस्यैव न शास्त्रबोध्यत्वं विरुद्धत्वादित्याह—**यद्धीति**। चेदिति निश्चयार्थे। **कृतेति**। इदं कृतमिदं कर्तव्यमिति ज्ञान-विरोधीत्यर्थः। **कर्तव्यतां** तज्ज्ञानमित्यर्थः।

विध्यभावेन वेदान्तानां न तादृगात्मबोधकत्वमित्याशङ्क्य पुरुषस्य कर्तव्याभिमुखीकरणार्थत्वाद्विधेरिहाऽऽत्म-ज्ञानाभिमुखीकरणार्थं विधिस्वरूपस्यार्थवादस्य सत्त्वात्स्वरूपबोधकस्य तत्परवाक्यस्यापि सत्त्वाच्च नैवमित्युत्तर-माह—**न बोधयत्येवेत्यादिना**। उपसंहारादित्यनेन तत्सहचरितमात्मा वा इदमित्याद्युपक्रमादितात्पर्यलिङ्गं सूचयति।

मसी"त्येवमादिवाक्यानां तत्परत्वात्। उत्पन्नस्य च ब्रह्मात्मविज्ञानस्याबाध्यमानत्वान्नानुत्पन्नं भ्रान्तं वेति शक्यं वक्तुम्। त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वमिति चेत् "नाकृतेनेह कश्चन" इतिस्मृतेः। य आहुर्विदित्वा ब्रह्म व्युत्थानमेव कुर्यादिति तेषामप्येष समानो दोषः प्रयोजनाभाव इति चेत्, न। अक्रियामात्रत्वाद्व्युत्थानस्य। अविद्यानिमित्तो हि प्रयोजनस्य भावो न वस्तुधर्मः। सर्वप्राणिनां तद्(दद)र्शनात्। प्रयोजनतृष्णया च प्रेर्यमाणस्य वाङ्मनःकायैः प्रवृत्तिदर्शनात्। "सोऽकामयत जाया मे स्यात्" इत्यादिना पुत्रवित्तादि पाङ्क्तलक्षणं काम्यमेवेति "उभे ह्येते साध्यसाधनलक्षणे एषणे एव" इति वाजसनेयिब्राह्मणेऽवधारणात्।

अविद्याकामदोषनिमित्ताया वाङ्मनःकायप्रवृत्तेः पाङ्क्तलक्षणाया विदुषोऽविद्यादिदोषाभावादनुपपत्तेः क्रियाभावमात्रं व्युत्थानं न तु यागादिवदनुष्ठेयरूपं भावात्मकं तच्च विद्यावत्पुरुषधर्म इति न प्रयोजनमन्वेष्टव्यम्। न हि तमसि प्रविष्टस्योदित आलोके यद्गर्तपङ्कण्टकाद्यपतनं तत्किंप्रयोजनमिति प्रश्नार्हम्। व्युत्थानं तर्ह्यर्थप्राप्तत्वान्न चोदनार्हमिति गार्हस्थ्ये चेत्परब्रह्मविज्ञानं जातं तत्रैवास्त्वकुर्वत आसनं न ततोऽन्यत्र गमनमिति चेत्,

ज्ञानोत्पत्त्यनुवादिकाण्वश्रुतिबलादप्यनुत्पत्तिशङ्का न कार्येत्याह—**तदात्मानमिति**। तदिति जीवरूपेणावस्थितं ब्रह्मेत्यर्थः। छान्दोग्यबलादप्येवमेवेति वदन्गतिसामान्यन्यायं दर्शयति—**तत्त्वमसीति**। अनेन "तद्धास्य विजज्ञावि"ति वाक्यशेषोऽप्युपलक्ष्यते। अयमात्मा ब्रह्मेत्यादिरादिशब्दार्थः। कर्त्रात्मबोधककर्मकाण्डविरोधादुत्पन्नमपि ज्ञानं भ्रान्तमित्याशङ्क्य तस्य यथाप्राप्तकर्त्रात्मानुवादेनोपायमात्रपरत्वान्न वस्तुपरवेदान्तजन्यज्ञानबाधकत्वमित्याह—**उत्पन्नस्येति। नानुत्पन्नमिति**। वाक्यश्रवणानन्तरमकर्ताऽऽत्माऽहमिति ज्ञानस्यानुभवसिद्धत्वान्नाहमकर्तेति विपरीतज्ञानादर्शनाच्च नोभयं वक्तुं शक्यमित्यर्थः।

विदुषः प्रयोजनाभावान्न कर्मणि प्रवृत्तिरित्युक्तं तर्हि तत्त्यागेऽपि प्रयोजनाभावात्तत्रापि न प्रवृत्तिः स्यादिति शङ्कते—**त्यागेऽपीति**। तस्य विदुषः कृतेन कर्मणार्थो नास्ति, अकृतेन कर्माभावेनापीह लोके नार्थोऽस्तीति गीतासु स्मरणात्त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वमिति चेदित्यन्वयः। शङ्कामेव विवृणोति—**य आहुरिति**। कर्मत्यागस्य व्यापारात्मकत्वे व्यापारस्य क्लेशात्मकत्वात्तदनुष्ठानं प्रयोजनापेक्षं स्यात्। न त्वेतदस्ति। किन्तु क्रियाभावमात्रमौदासीन्यरूपम्। तस्य च स्वास्थ्यस्वरूपत्वात्स्वत एव प्रयोजनत्वान्न प्रयोजनान्तरापेक्षत्वमिति परिहरति—**नेति**। त्यागस्यान्यत्र क्लृप्तव्यापारहेतुजन्यत्वाभावान्न व्यापारत्वमिति वक्तुमन्यत्र क्लृप्तव्यापारहेतुमाह—**अविद्येत्यादिना**। यद्वा विदुषः कथं यत्नं विना व्युत्थानमौदासीन्यमात्रेण सिध्यतीत्याशङ्क्य क्रियाहेत्वभावात्क्रियाभाव इति वक्तुं तद्धेतुमाह—**अविद्येत्यादिना। प्रयोजनस्य भाव इति**। प्रयोजनस्य तृष्णेत्यर्थः। तस्या वस्तुधर्मत्वे विदुषोऽपि तृष्णा स्यादिति तन्निषेधति—**न वस्तुधर्म इति**। न वस्तुस्वभाव इत्यर्थः। वस्तुधर्मत्वे हि विदुषामविदुषां च सुप्तमूर्च्छितादीनां सा स्यान्न त्वेतदस्ति। हेतुमाह—**सर्वेति**। तद्दर्शनादिति पाठे वस्तुस्वभावाज्ञानिनां गोपालादीनामपि तृष्णादर्शनान्न वस्तुधर्म इति कथञ्चिद्योज्यम्। तृष्णाया अविद्याजन्यत्वमुक्त्वा तस्या व्यापारहेतुत्वमाह—**प्रयोजनेति**। दर्शनादिति पञ्चम्यविद्याकामदोषनिमित्ताया इत्युत्र हेतुत्वेन सम्बध्यते। न केवलं दर्शनमेव किन्तु श्रुतिरप्यस्तीत्याह—**सोऽकामयतेति**। सोऽकामयतेत्यादिना "उभे ह्येते एषणे एवे"ति वाक्येन च पुत्रवित्तादि काम्यमेवेति वाजसनेयिब्राह्मणेऽवधारणादित्यन्वयः। **पाङ्क्तलक्षणमिति**। जायापुत्रदैवमानुषवित्तद्वयकर्मभिः पञ्चभिर्योगात्पाङ्क्तलक्षणं कर्मेत्यर्थः। उभे इत्यस्यार्थमाह—**साध्यसाधनेति**।

एवं क्रियाहेतुं प्रदर्श्य तदभावादेव विदुषः क्रियाभावोऽयत्नसिद्ध इत्याह—**कामेति। पाङ्क्तलक्षणाया इति**। जायापुत्रदैववित्तमानुषवित्तकर्मभिः पञ्चभिर्लक्ष्यते साध्यत इति वैदिकी प्रवृत्तिः पाङ्क्तलक्षणेत्युच्यते। पञ्चसंख्यायोगेन गौण्या वृत्त्या पङ्क्तिच्छन्दःसम्बन्धोपचारात्। "पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ" इति श्रुतेरित्यर्थः। पाङ्क्तलक्षणाया इत्यनन्तरमनुपपत्तेरित्यनुषङ्गः। व्युत्थानमित्यनन्तरमयत्नसिद्धमिति शेषः। एवं च क्रियाभावस्यौदासीन्यात्मकस्य पुरुषस्वभावत्वेनायत्नसिद्धत्वे सति न प्रयोजनापेक्षेत्याह—**तच्चेति। पुरुषधर्म इति**। पुरुषस्वभाव इत्यर्थः। अज्ञानकार्यस्याज्ञाननिवृत्तावयत्नत एव निवृत्तिरित्यत्र दृष्टान्तमाह—**न हीति**। व्युत्थानस्य पुंव्यापाराधीनत्वाभावे विधेरनवकाशाद्विदुषो नियमेन व्युत्थानं न सिध्यतीति शङ्कते—**व्युत्थानं तर्हीति। ततोऽन्यत्र गमनमिति**। पारिव्राज्यस्वीकार इत्यर्थः। किं गार्हस्थ्यशब्देन गृहस्थोऽहमित्यभिमानपुरःसरं पुत्रवित्ताद्यभिमान

न। कामप्रयुक्तत्वाद्गार्हस्थ्यस्य। "एतावान्वै काम" इति। "उभे ह्येते एषणे एवे"त्यवधारणात्। कामनिमित्तपुत्रवित्तादिसम्बन्धनियमाभावमात्रं न हि ततोऽन्यत्र गमनं व्युत्थानमुच्यते। ततो न गार्हस्थ्य एवाकुर्वत आसनमुत्पन्नविद्यस्य। एतेन गुरुशुश्रूषातपसोरप्यप्रतिपत्तिर्विदुषः सिद्धा।

अत्र केचिद्गृहस्था भिक्षाटनादिभयात्परिभवाच्च त्रस्यमानाः सूक्ष्मदृष्टितां दर्शयन्त उत्तमाहुः। भिक्षोरपि भिक्षाटनादिनियमदर्शनाद्देहधारणमात्रार्थिनो गृहस्थस्यापि साध्यसाधनैषणोभयविनिर्मुक्तस्य देहमात्रधारणार्थमशनाच्छादनमात्रमुपजीवतो गृह एवास्त्वासनमिति। न। स्वगृहविशेषपरिग्रहनियमस्य कामप्रयुक्तत्वादित्युक्तोत्तरमेतत्। स्वगृहविशेषपरिग्रहाभावे च शरीरधारणमात्रप्रयुक्ताशनाच्छादनार्थिनः स्वपरिग्रहविशेषाभावेऽर्थाद्भिक्षुकत्वमेव। शरीरधारणार्थायां भिक्षाटनादिषु प्रवृत्तौ यथा नियमो भिक्षोः शौचादौ च तथा गृहिणोऽपि विदुषोऽकामिनोऽस्तु नित्यकर्मसु नियमेन प्रवृत्तिर्यावज्जीवादिश्रुतिनियुक्तत्वात्प्रत्यवायपरिहारायेति। एतन्नियोगाविषयत्वेन विदुषः प्रत्युक्तमशक्यनियोगत्वाच्चेति। यावज्जीवादिनित्यचोदनानर्थक्यमिति चेत्, न। अविद्वद्विषयत्वेनार्थवत्त्वात्। यत्तु भिक्षोः शरीरधारणमात्रप्रवृत्तस्य प्रवृत्तेर्नियतत्वं तत्प्रवृत्तेर्न [1]प्रयोजकम्। आचमनप्रवृत्तस्य पिपासापगमवन्नान्य-

उच्यत उत गृहस्थलिङ्गधारणम्? नाऽऽद्यः। विद्ययाऽविद्याकार्याभिमाननिवृत्तेरित्याह—**न कामेति**। न द्वितीयः। लिङ्गेऽप्यभिमानराहित्यस्य तुल्यत्वात्। न चैवं पारिव्राज्यलिङ्गेऽप्यभिमानाभावात्तस्याप्यसिद्धिरिति वाच्यम्। सर्वतोऽप्यभिमानराहित्येन सर्वसम्बन्धराहित्यं हि परमहंसपरिव्राजो लक्षणं न लिङ्गधारणम्। "न लिङ्गं धर्मकारणम्" इति स्मृतेः। ततश्च लिङ्गेऽप्यभिमानशून्यस्य पारिव्राज्यं सिद्धमित्याह—**कामनिमित्तेति। गार्हस्थ्य इति**। अभिमानात्मक इत्यर्थः। तर्हि गुरुशुश्रूषादावप्यभिमानो न स्यादित्याशङ्क्येष्टापत्तिरित्याह—**एतेनेति**।

ननु यथा पुत्रादिसम्बन्धनियमरहितस्यापि त्वन्मते देहधारणार्थिनो भिक्षोः परिग्रहव्यावर्तनार्थो भिक्षाटनादिरेवेति नियमोऽङ्गीक्रियते तथा गृहस्थस्याप्यभिमानशून्यस्यैव सतो देहधारणार्थं गृह एवास्त्वासनं न भिक्षुकत्वमविशेषादिति शङ्कते—**अत्र केचिद्गृहस्था इति**। तेषां न न्यायो मूलं किन्तु दृष्टभयादिकमेव मूलमित्युपहसन्नाह—**भिक्षाटनादिति**। परिभवः पामरैः क्रियमाणस्तिरस्कारः। **सूक्ष्मेति**। काक्वा व्यतिरेकेण स्थूलदृष्ट्य इत्यर्थः। भिक्षाटनादीत्यादिशब्देन प्राक्प्रणीतमयाचितमित्यादयो गृह्यन्ते। देहधारणमात्रार्थिनो भिक्षोरिति पूर्वेणान्वयः। सिद्धान्ती तस्यैवंभूतस्य स्त्रीपरिग्रहोऽस्ति वा न वा? इति विकल्प्याऽऽद्ये दूषणमाह—**न स्वेति**। स्वगृहविशेषशब्देन स्त्रीविशेषो गृह्यते। द्वितीये स्त्रीपरिग्रहवत एव द्रव्यपरिग्रहाधिकारात्तदभावेऽर्थाद्द्रव्यपरिग्रहनिवृत्तेस्तदभावे प्रकारान्तरेण जीवनसिद्धेरर्थाद्भिक्षाटनादिनियम एव सिध्यतीत्याह—**स्वगृहेति**। न च पुत्रादिपरिगृहीतेन जीवनमस्त्विति शङ्क्यम्। तैरपि स्वस्य स्वत्वेन सम्बन्धाभावे तदीयस्यापि परकीयद्रव्यतुल्यत्वेन तत्रापि भिक्षुत्वनियमादिति। अन्ये तु भिक्षोरपि भिक्षाटनादौ सप्तागारानसंक्लृप्तानित्यादिनियमः शौचादौ च चातुर्गुण्यादिनियमश्च प्रत्यवायपरिहारार्थं यथेष्यते तथा यावज्जीवादिश्रुतिबलात्प्रत्यवायपरिहारार्थं नित्यकर्मणि नियमेन प्रवृत्तिरित्याहुस्तदनुवदति—**शरीरधारणार्थायामिति**। अकुर्वत एव गृहेऽवस्थानं पूर्वमते शङ्कितम्। अस्मिन्मते त्वग्निहोत्राद्यनुष्ठानमपि कर्तव्यमिति शङ्कते। तथा पूर्वं परिग्रहव्यावृत्त्यर्थो भिक्षाटनादिविषयो दृष्टशरीरधारणप्रयोजनो नियमो दृष्टान्तत्वेनोक्तः। इह तु स भिक्षाटनादिगतसप्तागारत्वादिविषयोऽदृष्टार्थो दृष्टान्तत्वेनोक्त इति भेदः। दूषयति—**एतदिति**। तस्य सर्वनियोक्त्रीश्वरात्मत्वाच्च न नियोज्यत्वमित्याद्युक्तमित्याह—**अशक्येति**।

तर्हि तच्छ्रुतेरप्रामाण्ये भिक्षाटनादिनियमविधेरपि तत्स्यादित्यभिप्रायेण शङ्कते—**यावज्जीवेति**। अविदुषि नियोज्ये तत्प्रामाण्यं घटत इति नोक्तदोष इत्याह—**नेति**। तदुक्तप्रतिबन्दीं परिहर्तुमनुवदति—**यस्त्विति**। दूषयति—**तत्प्रवृत्तेरिति**। आचमनविधिनाऽऽचमने प्रवृत्तस्याऽऽर्थिको यः पिपासापगमस्तस्य यथा नान्यप्रयोजनार्थत्वं प्रयोजनं प्रयुक्तिस्तदर्थत्वं नाऽऽचमनप्रवृत्तिप्रयोजकत्वम्। तद्वज्जीवनार्थं भिक्षादौ प्रवृत्तस्य यस्तत्र नियमः स न भिक्षादिप्रवृत्तेः प्रयोजक इत्यर्थः। एतदुक्तं भवति। नियोज्यत्वाभावात्किल ब्रह्मविदो नियमविध्यनुपपत्तिराशङ्कते। तन्न युज्यते। कथम्। नियोज्यो हि नियोगसिद्ध्यर्थमपेक्ष्यते नियोगश्च प्रवृत्तिसिद्ध्यर्थम्। प्रवृत्तिश्चेदन्यतः सिद्धा किं नियोगेन।

---

१. न प्रयोजकमिति—यथा प्रायत्यार्थमाचमनं तत्प्रयुक्तं तेनाचमनेन पिपासापगमोऽर्थात् भवति न तु पिपासापगमः आचमनप्रयोजकः तद्वत् क्षुधानिवृत्तये भिक्षाटनं क्रियते। तत्र नियमो यः श्रुतः स आषनुङ्गिकः।

प्रयोजनार्थत्वमवगम्यते । न चाग्निहोत्रादीनां तद्वदर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तिः । अर्थप्राप्तप्रवृत्तिनियमोऽपि प्रयोजनाभावेऽनुपपन्न एवेति चेत्, न । तन्नियमस्य पूर्वप्रवृत्तिसिद्धत्वात्तदतिक्रमे यत्नगौरवादर्थप्राप्तस्य व्युत्थानस्य पुनर्वचनाद्विदुषः कर्तव्यत्वोपपत्तिः ।

अविदुषाऽपि मुमुक्षुणा पारिव्राज्यं कर्तव्यमेव । तथा च "शान्तो दान्तः" इत्यादिवचनं प्रमाणम् । शमदमादीनां चाऽऽत्मदर्शनसाधनानामन्याश्रमे त्वनुपपत्तेः । "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्" इति च श्वेताश्वतरे विज्ञायते । "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इति च कैवल्यश्रुतिः । "ज्ञात्वा नैष्कर्म्यमाचरेत्" इवि च स्मृतेः । "ब्रह्माश्रमपदे वसेत्" इति च । ब्रह्मचर्यादिविद्यासाधनानां च साकल्येनात्याश्रमिषूपपत्तेर्गार्हस्थ्येऽसम्भवात् । न चासम्पन्नं साधनं कस्यचिदर्थस्य साधनायालम् । यद्विज्ञानोपयोगीनि च गार्हस्थ्याश्रमकर्माणि तेषां परं फलमुपसंहृतं देवताप्ययलक्षणं संसारविषयमेव ।

अत एव दर्शपूर्णमासनियोगादेवावहनने नियमेन प्रवृत्तिसिद्धौ तत्र न पृथङ्नियोगोऽङ्गीक्रियते । तदभावे च न नियोज्यापेक्षेति ब्रह्मविदो नियोज्यत्वाभावेऽपि न नियमविध्यनुपपत्तिरिति । अग्निहोत्रादिप्रवृत्तेस्त्वन्यतोऽसिद्धत्वेन तद्विधित एव तत्र प्रवृत्तेर्वक्तव्यत्वेन तत्सिद्ध्यर्थं तत्र नियोगे वाच्ये तस्य तत्र नियोज्यापेक्षेति वैषम्यमाह--**न चाग्निहोत्रेति।** नियमविधौ नियोज्यानपेक्षायामपि तस्य क्लेशात्मकत्वात्प्रयोजनापेक्षा वाच्या । तदभावान्न नियमः सिध्यतीति शङ्कते--**अर्थप्राप्तेति ।** तन्नियमस्यापि पूर्ववासनावशादेव प्राप्तत्वात्तत्रापि न नियमविधेरवकाशो येन प्रयोजनापेक्षा स्यादिति परिहरति--**न तदिति ।** यद्यपि नियतेन वाऽनियतेन भिक्षाटनादिना जीवनं सिध्यति तथापि विद्योत्पत्तेः पूर्वं विद्यासिद्ध्यर्थं नियमस्यानुष्ठितत्वात्तद्वासनाप्राबल्याद्विद्योत्पत्त्यनन्तरमपि नियम एव प्रवर्तते नानियमे। तद्वासनानां नियमवासनाभिरत्यन्तमभिभूतत्वेन पुनस्तदुद्बोधनस्य यत्नसाध्यत्वात्ततस्तत्र न प्रवर्तत इति नियमोऽप्यर्थसिद्ध इत्यर्थः । एतेन प्रत्यवायपरिहारार्थत्वमपि नियमानुष्ठानस्य निरस्तं तस्य विदुषः प्रत्यवायाप्रसक्तेरिति । एवमुक्तरीत्या व्युत्थानस्य विधिं विना स्वतः प्राप्तत्वेऽपि सति तत्कर्तव्यताविधिमपि "विदित्वा व्युत्थाये"त्यादिकमनुमोदते विद्वानित्याह--**अर्थप्राप्तस्येति ।** विधितः कर्तव्यत्वोपपत्तिरित्यर्थः । न च विधेः प्रयोजनाभावोऽप्रवर्तकत्वादिति वाच्यम्। प्रैषोच्चारणाभयदानादिवैधमुख्यधर्मप्राप्त्यर्थत्वेन विधेरर्थवत्त्वात् । न च तस्यापि वैयर्थ्यं शङ्क्यम् । विदुषि परमहंसे लोकसंग्रहार्थत्वात् । तस्य तु संग्रहस्य पूर्वाभ्यस्तमैत्रीकरुणादिवासनाप्राप्तत्वेन ब्रह्मविद्योपदेशादाविव प्रयोजनानपेक्षणात् । यद्वा प्रारब्धकर्माक्षिप्तदेहेन्द्रियादिप्रतिभासेनाविचारितयावज्जीवादिश्रुतिजनितकर्मकर्तव्यताभ्रान्तौ तन्निवर्तनेन वा विदुषो व्युत्थानविधेरर्थवत्त्वोपपत्तिरिति भावः ।

एवं विदुषो व्युत्थानसाधनेन विद्याया अकर्मनिष्ठत्वं साधितम् । तेनैव च तस्याः कर्मासम्बन्धोऽप्यर्थात् साधितः । इदानीं विविदिषोरपि व्युत्थानं प्रसाधयन्विद्यायाः कर्मनिष्ठत्वं कर्मसम्बन्धित्वं च दूरापास्तमित्याह--**अविदुषाऽपीति ।** तत्र श्रुतिमाह--**तथा चेति ।** "उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येदि"ति श्रुतिशेषः । तत्रोपरतशब्देन संन्यासो विहित इति भावः । शमादिशाधनानां पौष्कल्येनानुष्ठानस्य गृहस्थादिष्वसम्भवात्तद्विधिनाऽप्यर्थादाक्षिप्यते संन्यास इति श्रुतार्थापत्तिमप्याह--**शमदमादीनां चेति ।** चशब्द उपरमसमुच्चयार्थः । नेदं विद्वद्विषयम् । तस्य साधनविधिवैयर्थ्यात् । किन्तु विविदिषुविषयमिति वक्तुमात्मदर्शनसाधनानामित्युक्तम् । **अत्याश्रमिभ्य इति ।** ब्रह्मचर्यादीन्हंसान्तानाश्रमधर्मवत आश्रमानतिक्रम्य वर्तते परमहंस इति सोऽत्याश्रमिशब्देनोच्यत इति तद्विधिरत्र प्रतीयत इत्यर्थः । ऋषिसङ्घजुष्टं मन्त्रसमूहैर्ज्ञानिसमूहैर्वा सेवितं तत्त्वं प्रोवाचेत्यर्थः । **न कर्मणेति ।** त्यागस्य साक्षादमृतत्वसाधनत्वाभावेनामृतत्वसाधनं ज्ञानं त्यागेनाऽऽनशुः प्राप्तवन्तः इत्यभिधानेन ज्ञानसाधनत्वेन त्यागोऽत्र विहित इत्यर्थः । **ज्ञात्वेति ।** आपाततो ब्रह्म ज्ञात्वा निश्चयार्थं नैष्कर्म्यं कर्मत्यागरूपं संन्यासमाचरेदिति स्मृत्यर्थः । **ब्रह्मेति ।** ब्रह्मज्ञानसाधनीभूत आश्रमो ब्रह्माश्रमः । संन्यास इत्यर्थः । किञ्च "एकाकी यतचित्तात्मा" इत्याद्युपक्रम्य "ब्रह्मचारिव्रते स्थितः । मनः संयम्य मच्चितो युक्त आसीत मत्परः" इत्यन्तेन ब्रह्मचर्यादिसाधनविधिबलादप्यर्थात्संन्यासविधिरित्याह--**ब्रह्मचर्यादीति ।**

ननु गृहस्थस्याप्यृतुकालमात्रगमनलक्षणं ब्रह्मचर्यं कदाचिद्ध्यानकाल एकाकित्वादिकं च सम्भवतीत्याशङ्क्य तस्यापुष्कलसाधनत्वात्ततो ज्ञानासिद्धेर्ध्यानकाले पत्नीसम्बन्धाप्रसक्तेस्तद्विधिवैयर्थ्याच्च नैवमित्याह--

यदि कर्मिण एव परमात्मविज्ञानमभविष्यत्संसारविषयस्यैव फलस्योपसंहारो नोपापत्स्यत। अङ्गफलं तदिति चेन्न। तद्विरोध्यात्मवस्तुविषयत्वादात्मविद्यायाः। निराकृतसर्वनामरूपकर्मपरमार्थात्मवस्तुविषयं ज्ञानममृतत्वसाधनम्। [1]गुणफलसम्बन्धे हि निराकृतसर्वविशेषात्मवस्तुविषयत्वं विज्ञानस्य न प्राप्नोति तच्चानिष्टम्। "यत्र त्वस्य सर्वमात्मैवाभूत्" इत्यधिकृत्य क्रियाकारकफलादिसर्वव्यवहारनिराकरणाद्विदुषः। तद्विपरीतस्याविदुषो "यत्र हि द्वैतमिवे"त्युक्त्वा क्रियाकारकफलरूपस्यैव संसारस्य दर्शितत्वाच्च वाजसनेयिब्राह्मणे। तथेहापि देवताप्ययं संसारविषयं यत्फलमशनायादिमद्वस्त्वात्मकं तत्फलमुपसंहृत्य केवलसर्वात्मकवस्तुविषयं ज्ञानममृतत्वाय वक्ष्यामीति प्रवर्तते। ऋणप्रतिबन्धश्चाविदुष एव मनुष्यपितृदेवलोकप्राप्तिं प्रति, न विदुषः। "सोऽयं मनुष्यलोकः पुत्रेणैव" इत्यादिलोकत्रयसाधननियमश्रुतेः। विदुषश्चर्णप्रतिबन्धाभावो दर्शित आत्मलोकार्थिनः "किं प्रजया करिष्यामः" इत्यादिना। तथा "एतद्ध स्म वै तद्विदांस आहुर्ऋषयः कावषेयाः" इत्यादि। "एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रुः" इति च कौषीतकिनाम्।

अविदुषस्तर्ह्यृणानपाकरणे पारिव्राज्यानुपपत्तिरिति चेत्। न। प्राग्गार्हस्थ्यप्रतिपत्तेर्ऋणित्वासम्भवादधि-

न चेति। अतो न कर्मिनिष्ठत्वं कर्मसम्बन्धित्वं चाऽऽत्मज्ञानस्येत्यर्थः। यत्तु कर्म च बृहतीसहस्रलक्षणं प्रस्तुत्याऽऽत्मज्ञानं प्रारभ्यत इत्यादिना कर्मसम्बन्धित्वमुक्तं तत्राऽऽह—**यद्विज्ञानेति**। तथा च पूर्वोक्तं कर्मसम्बन्धिज्ञानं संसारफलकमन्यदेव। तच्चोपसंहृतमिति न तत्परमात्मज्ञानमित्यर्थः।

ननु पूर्वोक्तमेव परमात्मज्ञानं तच्च कर्मसम्बन्ध्येवेत्याशङ्क्य तस्य संसारफलकत्वेनोपसंहारात्परमात्मज्ञानस्य च मुक्तिफलकत्वान्न तत्परमात्मज्ञानमित्याह—**यदि कर्मिण एवेति**। कर्मिनिष्ठत्वेनोक्तज्ञानमेव परमात्मज्ञानं चेदित्यर्थः। परमात्मज्ञानाङ्गभूतपृथिव्यग्न्यादिदेवताज्ञानस्य तत्संसारफलं नाङ्गिनः परमात्मज्ञानस्येति न तस्य मुक्तिफलत्वविरोध इति शङ्कते—**अङ्गेति**। परमात्मज्ञानस्याङ्गसम्बन्धफलसन्बन्धादिसर्वविशेषरहितनिर्विशेषवस्तुविषयत्वान्न तस्याङ्गादिसम्बन्धित्वं येन तदङ्गविषयत्वमुक्तफलस्य स्यादिति परिहरति—**न तदिति**। तदेव स्पष्टयति—**निराकृतेत्यादिना**। **तच्चानिष्टमिति**। "आत्मा वा" इत्यादिभिरुपक्रमादिलिङ्गैरात्मनो निर्विशेषत्वसिद्धेरित्यर्थः। वाजसनेयिब्राह्मणे च परमात्मविदः सर्वसम्बन्धशून्यत्वमुक्त्वाऽविदुषः संसारफलोक्तेश्चेह संसारफलकस्यातीतस्य ज्ञानस्य न परमात्मज्ञानत्वं वक्ष्यमाणस्य निर्विशेषवस्तुविषयस्यैव परमात्मज्ञानत्वं मुक्तिफलत्वं चेत्याह—**यत्रेत्यादिना**। तथेहापीति वाक्ये फलपदद्वयपाठ एकं पदं निष्पाद्यत्वार्थकं निष्पाद्यत्वादपि संसारविषयं संसारान्तर्गतमिति वक्तुम्।

एवं कर्मासम्बन्धित्वं ज्ञानस्योक्त्वा यावज्जीवादिश्रुतेः कर्मत्यागो न सम्भवतीति यत्पूर्ववादिनोक्तं तत्र यावज्जीवादिश्रुतेरविद्वद्विषयत्वमुक्तम्। ऋणश्रुतेरिदानीं गतिमाह—**ऋणेति**। ऋणस्यानपाकृतस्य मनुष्यादिलोकप्राप्तिं प्रति प्रतिबन्धकत्वात्तदर्थिनोऽविदुष एवर्णापाकरणं कर्तव्यं न मुमुक्षोः। मुक्तिं प्रति तस्याप्रतिबन्धकत्वादित्यर्थः। नन्वृणस्य मुक्तिं प्रत्यपि प्रतिबन्धकत्वमस्तु विशेषाभावात्। "अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः" इति स्मृतेश्चेत्याशङ्क्याऽऽह—**सोऽयमिति**। "सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा, कर्मणा पितृलोको विद्यया देवलोकः" इति श्रुतेः पुत्रादीनां मनुष्यलोकादिहेतुत्वावगमात्पुत्रादिभिरपाकर्तव्यानां पुत्राद्यभावरूपाणामृणानां पुत्रादिसाध्यलोकप्राप्तिं प्रति प्रतिबन्धकत्वमेव युक्तम्। ऋणानपाकरणे पुत्रादिसाधनाभावेन साध्यलोकाभावात्। न मुक्तिं प्रति, तस्यास्तदभावरूपपुत्रादिसाध्यत्वाभावात्। स्मृतेश्च रागिणं प्रति संन्यासनिन्दार्थंवादमात्रत्वादित्यर्थः। न केवलमुक्तन्यायतो मुक्तिं प्रत्यप्रतिबन्धकत्वं किन्तु श्रुतितोऽपीत्याह—**विदुषश्चेति**। श्रुतित्रयेण क्रमेण प्रजाध्ययनकर्मणामननुष्ठितानामप्रतिबन्धकत्वं दर्शितम्। कावषेया इत्यनन्तरं किमर्था वयमध्येष्यामह इति शेषो द्रष्टव्यः।

शङ्कते—**अविदुषस्तर्हीति**। यद्यप्यविदुषोऽपि लोकत्रयं प्रत्येव प्रतिबन्धकत्वान्मुक्तिं प्रति प्रतिबन्धकत्वाभावादृणस्यानपाकरणीयत्वान्मुमुक्षोः पारिव्राज्यसम्भवादाशङ्का न सम्भवति तथाऽपि विद्वांस आहुरित्युक्तिश्रवण-

---

१. गुणफलसम्बन्धः—यथाऽग्निहोत्रप्रकरणे "दध्नेन्द्रियकामस्य जुहुयादि"ति। अत्राग्निहोत्रसाधनं पयआदिकं; दध्ना चेत् तत् क्रियते तदा तत्फलमिन्द्रियं लभ्यते तद्वत्।

कारानारूढोऽप्यृणी चेत्स्यात्सर्वस्यर्णित्वमित्यनिष्टं प्रसज्येत। प्रतिपन्नगार्हस्थ्यस्यापि "गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा" इत्यात्मदर्शनोपायसाधनत्वेनेष्यत एव पारिव्राज्यम्। यावज्जीवादिश्रुतीनामविद्वदमुमुक्षुविषये कृतार्थता। छान्दोग्ये च केषाञ्चिद्द्वादशरात्रमग्निहोत्रं हुत्वा तत ऊर्ध्वं परित्यागः श्रूयते। यत्त्वनधिकृतानां पारिव्राज्यमिति। तन्न। तेषां पृथगे"वोत्सन्नाग्निरनग्निको वे"त्यादिश्रवणात्सर्वस्मृतिषु चाविशेषेणाऽऽश्रमविकल्पः प्रसिद्धः समुच्चयश्च।

यत्तु विदुषोऽर्थप्राप्तं व्युत्थानमित्यशास्त्रार्थत्वे गृहे वने वा तिष्ठतो न विशेष इति तदसत्। व्युत्थानस्यैवार्थप्राप्तत्वान्नान्यत्रावस्थानं स्यात्। अन्यत्रावस्थानस्य कामकर्मप्रयुक्तत्वं ह्यवोचाम। तदभावमात्रं व्युत्थानमिति च।

मात्रेणेयं शङ्का। यद्वा परिहारान्तरं वक्तुमियं शङ्का द्रष्टव्या। गृहस्थस्यैवर्णप्रतिबन्धकत्वं तस्यैव तन्निराकरणाधिकारात्। ततश्च गार्हस्थ्यप्रतिपत्तेः प्राग्ब्रह्मचर्यं एव मुमुक्षोः पारिव्राज्यं सम्भवतीति परिहरति—**नेति**। यद्यप्युपनयनानन्तरमेवर्ष्यृणनिवर्तनेऽधिकारः सम्भवतीति प्राग्गार्हस्थ्येत्ययुक्तं तथाऽपि विविदिषासंन्यासेऽधीतवेदस्यैवाधिकार इत्यधीतवेदस्यैव गार्हस्थ्यप्रतिपत्तेः प्रागिति द्रष्टव्यम्। ननु "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इति जायमानमात्रस्यर्णवत्वं प्रतीयत इत्याशङ्क्यर्णित्वोक्तेः प्रयोजनं न साक्षात्किञ्चिदस्ति किन्तु ब्रह्मचर्यादिकर्तव्यताज्ञापनम्। न चाधिकारानारूढस्तत्कर्तुं शक्नोति जायमानमात्रस्यासामर्थ्यात्। किञ्च ब्राह्मणग्रहणात्क्षत्रियादेर्ऋणाभावप्रसङ्गः। द्विजात्युपलक्षणत्वेऽधिकार्युपलक्षणत्वमेव न्याय्यम्। अतो जायमानपदमधिकारं लक्षयतीति जायमानोऽधिकारी सम्पद्यमान इति तदर्थः। ततश्च ततः प्राङ्नर्णसम्बन्ध इत्याह **अधिकारेति। अनिष्टमिति**। ब्रह्मचारिणोऽप्यृणित्वे ब्रह्मचर्य एव मृतस्य नैष्ठिकस्य च लोकप्रतिबन्धः स्यात्तच्चानिष्टम्। "अष्टाशीतिसहस्राणी"त्यारभ्य "तदेव गुरुवासिनामि"त्यादिपुराणे लोकप्राप्त्युक्तेरित्यर्थः। न केवलं गार्हस्थ्यात्प्रागेव संन्याससिद्धिः किन्तु विधिबलाद्गृहस्थस्यापि तदस्तीत्याह—**प्रतिपन्नेति। आत्मदर्शनेति**। आत्मदर्शने य उपायाः श्रवणादयस्तत्साधनत्वेनेत्यर्थः। न चर्णश्रुत्या प्रव्रज्याविधेर्विरोधः। तस्या अवदानार्थवादमात्रत्वेन स्वार्थे तात्पर्याभावात्। अन्यथा "तदवदानैरेवावदयते तदवदानानामवदानत्वमि"त्यवदानमात्रनिरस्यत्वोक्त्या ब्रह्मचर्यादीनामप्यननुष्ठेयत्वप्रसङ्गादिति भावः। एवमपि यावज्जीवादिश्रुतिविरोधः संन्यासश्रुतेरित्याशङ्क्याऽऽह—**यावज्जीवेति**। विरक्तमुमुक्षुमात्रविषयिण्या संन्यासश्रुत्या यावज्जीवादिसामान्यश्रुतेरमुमुक्षुविषये सङ्कोच इत्यर्थः। अग्निहोत्रविषयकयावज्जीवादिश्रुतेर्नायमेव सङ्कोचः किन्तु श्रुत्यन्तरेणैव द्वादशरात्रानन्तरमग्निहोत्रत्यागविधायिना सा पूर्वमेव सङ्कोचितेति न तां विरोद्धुं शक्नोतीत्याह—**छान्दोग्य इति**। केषाञ्चिच्छाखिनां "त्रयोदशरात्रमहतवासा यजमानः स्वयमग्निहोत्रं जुहुयादथाप्रवसन् तत्रैव सोमेन पशुना वेष्ट्वाऽग्नीनुत्सृजति" इति श्रूयत इत्यर्थः।

ननु पारिव्राज्यश्रुतिरप्यनधिकृतविषये सङ्कोचितेत्याह—**यत्त्विति**। वचनान्तरेणैव तेषां तद्विधेर्नास्या अनधिकारी विषयः किन्त्वधिकार्येवेति परिहरति—**तन्नेति**। उत्सन्नाग्निर्नष्टाग्निः निरग्निरपरिगृहीताग्निरिति भेदः। स्मृत्युपबृंहितत्वादपि पारिव्राज्यश्रुतिर्बलीयसीत्याह—**सर्वस्मृतिषु चेति**। अत एव "ब्रह्मचर्यवान्प्रव्रजति" "बुद्ध्वा कर्माणि यमिच्छेत्तमावसेत्" 'ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः। य इच्छेत्परमं स्थानमुत्तमां वृत्तिमाश्रयेत्॥" इत्यादिषु स्मृतिषु विकल्पः प्रसिद्धः। "अधीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्" ॥ इत्यादिषु समुच्चयश्च सिद्ध इत्यर्थः।

एवं विविदिषासंन्यासं प्रसाध्य पूर्वप्रसाधितविद्वत्संन्यासे शङ्कामनुवदति—**यत्त्विति**। पूर्वत्र गृह एवास्त्वासनमिति शङ्का निरस्ता। इह तु गृहे वा वने वाऽस्त्वासनमित्यनियमशङ्कां निराकर्तुं सा पुनरनूद्यते। यथेष्टचेष्टामधिकां परिहर्तुं चेति द्रष्टव्यम्। यद्यप्यर्थप्राप्तस्यापि पुनर्वचनादित्यत्र विद्वद्व्युत्थानस्यापि शास्त्रार्थत्वमुक्तमेव तथाऽप्यशास्त्रार्थत्वमुक्तमङ्गीकृत्याप्याह—**तदसदिति**। यदि व्युत्थानवद्गार्हस्थ्यमप्यर्थप्राप्तं स्यात्स्यादेवमनियमो न त्वेतदस्तीत्याह—**व्युत्थानस्यैवेति। अन्यत्रेति**। गार्हस्थ्य इत्यर्थः। नन्वन्यत्रावस्थानवद्व्युत्थानस्यापि कामादिप्रयुक्तत्वमनुष्ठेयत्वादित्याशङ्क्याऽऽह—**तदभावेति**। कामाद्यभावमात्रमेव व्युत्थानमित्युक्तत्वात्तस्य नानुष्ठेयत्वमित्यर्थः।

यथाकामित्वं तु विदुषोऽत्यन्तमप्राप्तमत्यन्तमूढविषयत्वेनावगमात्। तथा शास्त्रचोदितमपि कर्माऽऽत्मविदोऽप्राप्तं गुरुभारतयाऽवगम्यते किमुतात्यन्ताविवेकनिमित्तं यथाकामित्वम्। न ह्युन्मादतिमिरदृष्टचुपलब्धं वस्तु तदपगमेऽपि तथैव स्यादुन्मादतिमिरदृष्टिनिमित्तत्वादेव तस्य। तस्मादात्मविदो व्युत्थानव्यतिरेकेण न यथाकामित्वं न चान्यत्कर्तव्यमित्येतत्सिद्धम्।

यत्तु—[1]"विद्यां चाविद्यां च यस्तद्वेदोभयं सह" इति न विद्यावतो विद्यया सहाविद्याऽपि वर्तत इत्ययमर्थः। कस्तर्ह्येकस्मिन्पुरुष एकदैव न सह सम्बध्येयातामित्यर्थः। यथा शुक्तिकायां रजतशुक्तिकाज्ञाने एकस्य पुरुषस्य। "दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाते"ति हि काठके। तस्मान्न विद्यायां सत्यामविद्यासम्भवोऽस्ति। "तपसा ब्रह्म विजिज्ञासस्व" इत्यादिश्रुतेः। तपआदिविद्योत्पत्तिसाधनं गुरूपासनादि च कर्माविद्यात्मकत्वादविद्योच्यते। तेन विद्यामुत्पाद्य मृत्युं काममतितरति। ततो निष्कामस्त्यक्तैषणो ब्रह्मविद्यायाऽमृतत्वमश्नुते इत्येतमर्थं दर्शयन्नाह—"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति। यत्तु पुरुषायुः सर्वं कर्मणैव व्याप्तं "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यविद्वद्विषयत्वेन परिहृतमितरथाऽसम्भवात्। यत्तु वक्ष्यमाणमपि पूर्वोक्ततुल्यत्वात्कर्मणाऽविरुद्धमात्मज्ञानमिति तत्सविशेषनिर्विशेषात्मतया प्रत्युक्तमुत्तरत्र व्याख्याने च दर्शयिष्यामः। अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्शनार्थमुत्तरो ग्रन्थ आरभ्यते।

एवमनियमशङ्कां निरस्य व्युत्थानस्याशास्त्रार्थत्वे यथेष्टचेष्टामाशङ्क्य निराकरोति—**यथाकामित्वमिति**। चेष्टामात्रमेव कामादिप्रयुक्तम्। निषिद्धचेष्टा तु शास्त्रार्थज्ञानशून्यात्यन्तमूढविषया। तदुभयं च विदुषो नास्तीति चेष्टामात्रमेवाप्रसक्तं निषिद्धचेष्टा तु दूरापास्तेत्यर्थः। एतदेव विवृणोति—**तथेति**। तथा हीत्यर्थे तथाशब्दः। गुरुभारतयाऽतिक्लेशतया यतोऽवगम्यतेऽतोऽप्राप्तमित्यन्वयः। अविवेकादिनिमित्तापगमे नैमित्तिकापगम इत्यत्र दृष्टान्तमाह—**न हीति**। उन्माददृष्ट्युपलब्धं गन्धर्वनगरादि तिमिरदृष्टयुपलब्धं द्विचन्द्रादीति विवेकः। **न चान्यदिति**। वैदिकं कर्मेत्यर्थः। ननु विद्याऽविद्यायाः सहभावश्रवणाद्विदुषोऽपि तन्मूलकामादिकं स्यादेवेति तन्निमित्ता यथेष्टचेष्टा स्यादित्यत आह—**यस्त्विति**। यत्तु विद्यां चेति वचनं तस्य नायमर्थ इति तस्येतिशब्दाध्याहारेण वाक्यं योज्यम्। **एकस्मिन्निति**। कालभेदेन स्थितयोरप्येकस्मिन्पुरुषे साहित्यं तदर्थ इत्यर्थः। नन्विदं साहित्यं न स्वरसं किन्त्वेककाले साहित्यं स्वरसमित्याशङ्क्य श्रुत्यन्तरे विद्याविद्ययोः साक्षात्साहित्यस्यासम्भवोक्तेरुक्तमेव साहित्यं ग्राह्यमित्याह—**दूरमेते इति**। विषूची विष्वग्गमने विरुद्धे इत्यर्थः। अस्मिन्नपि मन्त्रे "अविद्यया मृत्युं तीर्त्वे"त्युत्तरार्धपर्यालोचनयाऽविद्याया विद्योत्पत्तिहेतुत्वावगमात्तयोः कालभेदेनैव सहत्वमित्याह—**तपसेत्यादिना**। यद्वा गुरूपासनतपसो अविद्येत्युच्यते। तयोश्च श्रवणकालेऽनुष्ठेयत्वाद्विद्योत्पत्तिकाल एकस्मिंस्तयोः साहित्यमस्तीत्यर्थान्तरमाह—**तपसेति**। अस्मिन्नर्थे मन्त्रशेषोऽप्यनुगुण इत्याह—**तेन विद्यामिति**। साक्षादविद्याया मृत्युत्वेन मृत्युतरणहेतुत्वानुपपत्तेरविद्याशब्देन तपआदिकमेवोच्यते। विद्याव्यवधानं चार्थात्कल्प्यत इत्यर्थः। **अविद्वद्विषयत्वेनेति**। **जिजीविषेदिति** जीवितेच्छारूपाविद्याकार्येण तस्याः सूचनादित्यर्थः। **परिहृतमिति**। यावज्जीवादिश्रुतिन्यायेन परिहृतप्रायमित्यर्थः। यद्वा तृतीयस्य चतुर्थपादे नाविशेषादिति सूत्रेण परिहृतमित्यर्थः। **असम्भवादिति**। विरोधेन विद्यया सहासम्भवादित्यर्थः। उदाहृतश्रुतिस्मृत्यसम्भवादिति वा। **प्रत्युक्तमिति**। निर्विशेषात्मज्ञानस्य कर्त्रादिकारकोपमर्दकत्वेन विरुद्धत्वादुपमर्दं चेति सूत्रेणाविरुद्धत्वं प्रत्युक्तमित्यर्थः। तस्माद्वक्ष्यमाणविद्यायाः अकर्मनिष्ठत्वं कर्मासम्बन्धित्वं केवलात्मविषयत्वं च सिद्धमिति पूर्वोक्तकर्मभिर्विद्यया च शुद्धसत्त्वस्यात एव केवलात्मस्वरूपावस्थानलक्षणमोक्षसिद्ध्यर्थं केवलात्मविद्याऽऽरभ्यत इत्युपसंहरति—**अत इति**।

---

१. यत्तु "विद्यां चाविद्यां चे"ति—ईशभाष्ये यद्यपि उपासनकर्मणोः समुच्चयोऽस्यार्थ इत्युक्तं तथापि विद्यापदमुख्यार्थभूतब्रह्मविद्याया ग्रहणेऽपि न दोषः, क्रमिकसमुच्चयपरत्वाद्वचनस्य। तेन न ज्ञानकर्मसमुच्चयावसरः। यद्वा तप आदि अविद्या, तेन ज्ञानसमुच्चये न कापि क्षतिः।

केचित्तु—"नम उक्तिं विधेम" इत्युपसंहारं काण्वशाखोये दृष्ट्वा ईशभाष्ये विद्यापदं सगुणविद्यापरतया व्याख्यातम्। अत्र तु माध्यन्दिनपाठमनुसृत्य विद्यापदं मुख्यब्रह्मविद्यापरतया व्याख्यातम्। तत्र हि उपनिषदन्ते "योऽसावादित्ये सोऽसावहम्। ओं खं ब्रह्म" इत्युपसंहारात् निर्गुणविद्यापरा इयमुपनिषदिति स्पष्टम्।

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारमवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः

५ **ॐ आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किंचन मिषत्।**

आत्मेति। आत्माऽऽप्नोतेरत्तेरततेर्वा परः सर्वशक्तिरशनायादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावोऽजरोऽमरोऽमृतोऽभयोऽद्वयो वा इदं यदुक्तं नामरूपकर्मभेदभिन्नं जगदात्मैवैकोऽग्रे जगतः सृष्टेः प्रागासीत्। किं नेदानीं स एवैकः? न। कथं तर्ह्यासीदित्युच्यते। यद्यपीदानीं स एवैकस्तथाऽप्यस्ति विशेषः। प्रागुत्पत्तेरव्याकृतनामरूपभेदमात्मभूतमात्मैकशब्दप्रत्ययगोचरं जगदिदानीं व्याकृतनामरूपभेदत्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्द-
१० **प्रत्ययगोचरं चेति विशेषः।**

यथा सलिलात्पृथक्फेननामरूपव्याकरणात्प्राक्सलिलैकशब्दप्रत्ययगोचरमेव फेनं यदा सलिलात्पृथङ्नामरूपभेदेन व्याकृतं भवति तदा सलिलं फेनं चेत्यनेकशब्दप्रत्ययभाक्सलिलमेवेति चैकशब्दप्रत्ययभाक् च फेनं भवति तद्वत्।

नन्वात्मनः सविशेषत्वप्रतीतेस्तद्विरोधात्कथं कैवल्यमित्याशङ्क्य विशेषस्य सर्वस्याऽऽत्मनि मायया कल्पितत्वान्न वास्तवनिर्विशेषत्वविरोध इति तदर्थं मायायाऽऽत्मनः सकाशात्सृष्टिं वक्तुं सृष्टेः पूर्वमात्मनो निर्विशेषरूपं
१५ दर्शयितुमात्मा वा इत्यादि वाक्यम्। तत्राऽऽत्मशब्दार्थमाह—**आत्मेति।** आत्मेति पदेन सर्वज्ञादिरूप आत्मोच्यत इत्यन्वयः। अद्वय इत्यनन्तरमुच्यत इति शेषः। नन्वात्मशब्देन कथमुक्तलक्षण आत्मोच्यत इत्याशङ्क्याऽऽत्मशब्दस्य स्मृत्युक्तव्युत्पत्तिबलाद्रूढ्या चेत्याह—**आप्नोतेरिति।** वाशब्दश्चार्थे आदानं च समुच्चिनोति। तथा च **स्मृतिः**—

"यच्चाऽऽप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते॥" इति।

अत्राऽऽप्तिर्ज्ञानं व्याप्तिश्चोच्यते। सत्तास्फुरणाभ्यां सर्वं व्याप्नोतीति सर्वज्ञत्वं सर्वशक्तित्वं चोच्यते।
२० **सत्ताप्रदानेनोपादानत्वसूचनात्सर्वशक्तित्वमत्तीत्यनेन** सहर्तृत्वमततीत्यनेन त्रिविधपरिच्छेदराहित्यमुच्यत इति। अशनायादिवर्जितत्वादिति विषयादानेन रूढ्या च प्रत्यगभेदश्चोच्यत इत्युक्तरूप आत्मपदेनोच्यत इत्यर्थः। अभिव्यक्तनामरूपव्यावर्त्तनेनाऽऽत्ममात्रवधारणार्थो वैशब्द इत्याह—**वा इति। यदुक्तमिति।** पूर्वत्र प्राणशब्दितप्रजापतिरूपत्वेन यदुक्तमित्यर्थः। यदुतेति पाठः साधुः। तत्रोतेति पदेन प्रत्यक्षादिप्रसिद्धमुच्यते। नन्वग्र इति विशेषणादासीदिति भूतत्वोक्तेश्च पूर्वमेवाऽऽत्ममात्रमिदानीं त्वात्ममात्रं न भवति किन्तु ततः पृथक्सदिति प्रतीयत
२५ इति नाद्वितीय आत्मेति शङ्कते—**किं नेदानीमिति।** जडस्य मायिकस्य कदाचिदपि स्वतः सत्त्वायोगादात्मनोऽद्वितीयत्वस्य न विरोध इत्याह—**नेति।** तर्ह्यात्ममात्रत्वस्येदानीमपि सत्त्वे भूतत्वोक्तेः का गतिरिति पृच्छति—**कथ तर्ह्यासीदिति।** इदमुपलक्षणमग्र इत्यपि कथमिति द्रष्टव्यम्। जगतः कालत्रयेऽप्यात्मव्यतिरेकेणाभावो यद्यपि तथाऽपि तथा बोधने बोध्यस्य प्रत्यक्षादिविरोधशङ्क्योक्तमात्मतत्त्वं बुद्धौ नाऽऽरोहेत्। अतः प्रागुत्पत्तेरासीदित्युच्यते बोध्यस्य चित्तमनुसृत्य तदपि जगतो नामरूपाभिव्यक्त्यभावमपेक्ष्यैव न त्विदानीमात्ममात्रत्वाभावाभिप्रायेणेत्युत्तर-
३० माह—**यद्यपीत्यादिना।** अव्याकृतो नामरूपभेदो यस्मिन्नात्मनि तथाविधात्मभूतमित्यर्थः। **आत्मैकशब्दप्रत्ययगोचरमिति।** यद्यपि प्रागुत्पत्तेर्वाग्बुद्ध्योरभावेन शब्दप्रत्ययौ तावपि न स्तस्तथाऽपीदानीं तदानींतनात्मतत्त्वं सुप्तादुत्थितः सुप्तिकालीनात्मतत्त्वमिव प्रमाणान्तरेण ज्ञात्वा तदानीमात्मैक एवाऽऽसीदिति वदति प्रत्येति चेति। तथोक्तेश्वरस्य वाऽऽत्मैकशब्दप्रत्ययौ स्त इति द्रष्टव्यम्। **अनेकशब्देति।** अविवेकिनां घटादिशब्दप्रत्ययगोचरं घटः सन्नित्यात्मशब्दपर्यायसच्छब्दगोचरं चेत्यर्थः। गोचरशब्दस्य भावप्रधानत्वमङ्गीकृत्य गोचरत्वं यस्येति बहुव्रीहिणा
३५ नपुंसकत्वं द्रष्टव्यम्। **आत्मैकशब्देति।** विवेकिनामित्यर्थः।

उक्तमर्थं दृष्टान्तेन विशदयति—**यथेति।** अत्राऽऽत्मशब्दव्युत्पत्तिबलात्सर्वज्ञादिशब्दोपलक्षितः सत्यज्ञानानन्तरूपोऽखण्डैकरस आत्मोपक्षिप्तः। तस्यैवार्थस्य दृढीकरणार्थमेकादिपदानि। तत्रैक इत्यात्मान्तराभाव

नान्यत्किञ्चन न किञ्चिदपि मिषन्निमिषद्वचापारवदितरद्वा। यथा सांख्यानामनात्मपक्षपाति स्वतन्त्रं प्रधानम्। यथा च काणादानामणवो न तद्वदिहान्यदात्मनः किञ्चदपि वस्तु विद्यते। किं तर्ह्यात्मैवैक आसीदित्यभिप्रायः।

उच्यते। एवेत्यनेन वृक्षादावेकत्वेऽपि शाखादिभिर्नानात्मत्ववदेकस्याप्यात्मनो नानात्मत्वाभाव उच्यत इति। स्वसजातीयभेदस्वगतभेदनिराकरणार्थत्वेन पदद्वयमित्यभिप्रेत्य विजातीयभेदनिराकरणार्थत्वेन नान्यत् किञ्चनेति पदं व्याचष्टे—**नान्यदिति**। ननु जडप्रपञ्चस्य कारणीभूता जडा माया वर्तत इति कथं विजातीयभेदनिषेध इत्यत आह—**मिषदिति**। मायायाः सत्त्वेऽपि तदानीं व्यापाराभावाद्व्यापारवतोऽन्यस्य निषेधः सम्भवतीत्यर्थः। ननु निर्व्यापाराया अपि तस्या अन्यस्याः सत्त्व आत्मशब्दोक्तं तस्याखण्डैकरसत्वं न सिध्येदित्यत आह—**इतरद्वेति**। निर्व्यापारं वेत्यर्थः। ननु माया तथाविधाऽस्तीति पुनः पूर्वोक्तदोषः स्यादित्याशङ्क्य मिषदित्यनेन स्वतन्त्रं स्वतःसत्ताकमुच्यते। तथाविधस्य च निषेध इति व्यतिरेकदृष्टान्तेनाऽऽह—**यथेति**। **अनात्मपक्षपातीति**। आत्मशक्तितयाऽऽत्मन्येवान्तर्भूतमात्मपक्षपातीत्युच्यते। तद्भिन्नमित्यर्थः। शक्तित्वेऽपि प्राभाकराणामिव तस्याः स्वतः सत्त्वं स्यान्नेत्याह—**स्वतन्त्रमिति**। यथा सांख्यानां प्रधानमशक्तिभूतं स्वतःसत्ताकमस्ति, काणादानां च तथाविधा अणवः सन्ति, तथाविधमात्मव्यतिरिक्तं मिषदित्यनेनानूद्य निषिध्यते। माया तु न तथाभूतेति नोक्तदोष इत्यर्थः। **दीपिकायां** तु धातूनामनेकार्थत्वेन मिषदिति धातोरासीदित्यर्थमुक्त्वा नान्यत्किञ्चिनाऽऽसीदिति वाक्यार्थ उक्तः। तदयं वाक्यार्थः—इदं जगदग्रे सजातीयविजातीयस्वगतभेदरहितात्मैवाऽऽसीदिति। अनेनात्मनोऽद्वितीयत्वं जगतस्तथाविधात्ममात्रतया मृषात्वं च सूचितम्। अनेनाग्रे जगत आत्ममात्रत्वोक्तेर्न किञ्चित्प्रयोजनमात्मैक एवाऽऽसीन्नान्यत्किञ्चनेत्येतावतैवाखण्डत्वसिद्धेरित्याशङ्क्य निरस्ता। जगन्मृषात्वसूचनस्यैव प्रयोजनत्वात्। न चैवमर्थभेदे वाक्यभेदः स्यादिति वाच्यम्। अखण्डत्वसम्भावनार्थमेव जगदनिर्वचनीयत्वस्येदं जगदखण्डात्मैवेति विशिष्टवेषेणोक्तत्वात्। विशेषणानां चार्थात्सिद्धेः "सोमेन यजेते"त्यत्रेवेति। अत्रार्थद्वयस्यापि सूचितत्वादेवान्तेऽपि तस्य त्रय आवसथास्त्रयः स्वप्ना इति जाग्रदादेः स्वप्नत्वेन मृषात्वमुक्त्वा स एतमेव पुरुषं ब्रह्म ततममपश्यदित्यात्मशब्दोक्तं ततत्मत्वं त्रिविधपरिच्छेदराहित्यलक्षणमखण्डत्वं वक्ष्यति। न चेदमात्मैवाऽऽसीदिति सामानाधिकरण्येनाऽऽत्मनो जगद्वैशिष्ट्यमेव प्रतीयते न तु जगतो मृषात्वमिति वाच्यम्। आत्मैक एवेति पदैरुक्तेऽखण्डैकरसे तद्विपरीतजगत्प्रतीतेरतस्मिंस्तद्बुद्धिरूपत्वेन मृषात्वसिद्धेर्जगद्वैशिष्ट्यस्य घटः सन्नित्यादिरूपेण प्रत्यक्षसिद्धत्वेन प्रयोजनाभावेन च तत्प्रतिपादनस्यानुपपत्तेश्च मृषात्वमेव तदर्थः। मिषदित्यनेन स्वातन्त्र्यनिषेधेन स्वतःसत्तानिषेधादपि मृषात्वसिद्धेश्च। स्वतःसत्तावत्त्वे स्वव्यापारे स्वातन्त्र्यमेव स्यात्। न चानेन प्रकारेणेदानीमपि मृषात्वस्याऽऽत्माखण्डत्वस्य च वक्तुं शक्यत्वादग्र इति विशेषणं व्यर्थमिति वाच्यम्। इदानीमात्मभिन्नतया पृथक्सत्त्वेन च प्रतीयमानत्वेन तस्य सहसाऽऽत्ममात्रत्वे बोधिते विरोधिप्रतीत्या तस्य बुद्ध्यनारोहः स्यादिति गुडजिह्विकान्यायेनाऽऽदौ पृथङ्नामरूपानभिव्यक्तिदशायामात्ममात्रत्वं बोध्यते। तस्मिन्बोधिते पश्चात्तन्न्यायेनेदानीमपि स्वयमेवाऽऽत्ममात्रत्वं ज्ञास्यतीत्यभिप्रायेणाग्र इति विशेषणोपपत्तेः। यद्वा **वाजसनेयके**—"तद्धेदं तर्ह्यव्याकृतमासीत्" इति सृष्टेः प्राक्कार्यस्यानभिव्यक्तनामरूपावस्थबीजभूताव्याकृतात्मतोच्यते, इह त्वात्ममात्रता। तत्र श्रुत्योर्विरोधपरिहारायोपसंहारे कर्तव्य इहाव्याकृतपदमुपसंह्रियते। तत्र चाऽऽत्मपदमितीदमग्रेऽव्याकृतमासीत्तच्च सदाऽऽत्मैवाऽऽसीदिति वाक्यं सिध्यति। तत्राव्याकृतशब्देन "तम आसीत्तमसा गूढमग्रे" "मायां तु प्रकृतिं विद्यात्" इत्यादिषु जगद्बीजावस्थायां तमआदिशब्दप्रयोगात्तमोरूपा मायोच्यते, तेन कार्यस्याग्रेऽनभिव्यक्तनामरूपात्मकमायात्मकत्वं सिध्यति। तस्याश्चाऽऽत्मतादात्म्योक्त्या **सांख्यमतवत्स्वतन्त्रत्वनिरासेन** तत्र कल्पितत्वं सिध्यति। तयोः कार्यकारणभावाद्यभावेन प्रकारान्तरेण तादात्म्यानिर्वाहात्ततश्चाऽऽत्मनोऽखण्डत्वं तद्भिन्नस्य मृषात्वं चाऽऽत्मनः परिणममानाविद्याधिष्ठानत्वेन विवर्तोपादानत्वं तस्याश्च परिणामित्वं च सूचितं भविष्यति। कार्यस्य च मृषात्वार्थमेवाव्याकृतात्मत्वमुच्यते। तस्याव्याकृतस्याऽऽत्मतादात्म्येन मायात्वेन च मृषात्वादिदानीं तु नानभिव्यक्तनामरूपबीजात्मत्वमित्यग्र इति विशेषणमप्यर्थवत्। तदभिप्रेत्यैव भाष्ये प्रागुत्पत्तेरनभिव्यक्तनामरूपभेदात्मभूतमात्मैकशब्दप्रत्ययगोचरं जगदिदानीं तु व्याकृतनामरूपभेदवत्त्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरं चेति विशेष इतीदानींतनाभिव्यक्तनामरूपबीजात्मत्वमेवाग्रशब्दस्य व्यावर्त्यमुक्तम्। न च साक्षादिदानीमेव मायात्मत्वेन मृषात्व-

स ईक्षत लोकान्नु सृजा इति ॥१॥

स सर्वज्ञस्वाभाव्यादात्मैकः सन्नीक्षत लोकान्नु सृजा इति। ननु प्रागुत्पत्तेरकार्यकरणत्वात्कथमीक्षितवान् ? नायं दोषः। सर्वज्ञस्वाभाव्यात्। तथा च मन्त्रवर्णः—"अपाणिपादो जवनो ग्रहीता" इत्यादिः। केनाभिप्रायेणेत्याह—लोकानम्भःप्रभृतीन्प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजै सृजेऽहमिति ॥ १ ॥

मुच्यतामिति वाच्यम्। इदानीं प्रत्यक्षादिविरोधेन तथा बोधयितुमशक्यत्वादित्युक्तत्वान्नामरूपाभिव्यक्तेः सृष्टेः पूर्वमभावेनेदानीमेव विद्यमानत्वेन कादाचित्कत्वादपि रज्जुसर्पादिवन्मृषात्वमिति वक्तुमपि प्रागव्याकृतत्वोक्तिरर्थवतीति न किञ्चिदवद्यम्। अथवा जगदधिष्ठानं किञ्चित्सद्रूपं सम्भावयितुमिदमग्र आसीदित्युच्यते। असम्भाविते तस्मिन्नखण्डत्वोक्तेर्निर्विषयत्वप्रसङ्गात्। अनेनासतः शशविषाणादेरिव सद्रूपेणोत्पत्त्यसम्भवात्कार्यस्य प्रागवस्था सदात्मिका काचित्सम्भाविता। तस्याश्चाचेतनत्वे कार्याकारेण स्वतोऽप्रवृत्तेरतिरिक्तचेतनाधिष्ठानाङ्गीकारे च गौरवात् उपादानाधिष्ठानत्वयोरेकस्मिन्नेवाऽऽत्मनि घटसंयोगादाविव सम्भवाच्च चेतनत्वमात्मैवेत्यनेन सम्भाव्यते। एवं सम्भाविते ह्यधिष्ठानाभिन्न उपादानकारण आत्मन्यखण्डैकरसत्वं तस्य वक्तुमेक एव नान्यत्किञ्चनेति पदानि। अस्मिन्पक्षे चेदमग्र आत्मैवाऽऽसीदित्यंशेन सम्भावितं कार्यस्य प्राग्रूपमनूद्य यदात्मकमिदमासीत्स एक एव नान्यत्किञ्चनेत्यखण्डैकरसत्वं विधीयत इति न कस्यचिदप्यानर्थक्यम्। अत एव **छान्दोग्ये** "सदेव सोम्येदमग्र आसीत्" इत्यस्य सद्रूपकारणसम्भावनार्थत्वादेव तत्सिद्ध्यर्थं तद्धैक आहुरित्यादिनाऽसत्कारणवादो निरस्तः। अन्यथाऽसिद्धस्य सतोऽद्वितीयत्वमात्रविवक्षायां तस्याप्रस्तुतत्वप्रसङ्गात्। अस्मिन्नपि व्याख्याने कारणस्याद्वितीयत्वादेव च तदन्यस्य मृषात्वमपि सिध्यति। कार्यस्य मृषात्वे तन्निरूपितं कारणत्वमपि तथेति तथाविधात्मज्ञानान्मुक्तिरपि वक्ष्यमाणा सिध्यतीति न किञ्चिदवद्यम्। **दीपिकायां** त्विदमात्मैवाऽऽसीदिति सामानाधिकरण्यं बाधायां यश्चोरः स स्थाणुरितिवदिदानीं जगद्विशिष्टात्मप्रतिभासेन तत्र बाधानुपपत्त्या स्थितिकालं परित्यज्याग्रशब्देन सृष्टेः प्राचीन काल उपादीयते। सृष्टप्रपञ्चबाधया सिद्धस्याखण्डैकरसत्वस्य स्पष्टीकरणार्थमेकादिशब्दा इति न कस्याप्यानर्थक्यमित्युक्तम्। तत्राग्रशब्दस्य न प्रयोजनमारोप्यप्रतीतिदशायामेव यश्चोरः स स्थाणुरित्यादौ बाधदर्शनेनेहापि जगत्प्रतीतिदशायामेव तद्बाधनस्य न्याय्यत्वात्सृष्टेः प्रागप्रतीतस्य बाधानुपपत्तेश्च। किञ्च कालत्रयनिषेधो हि बाधः प्राक्काल एव निषेधे बाध एव न स्यात्। न हि पाकरक्ते घटे पूर्वं न रक्तो घट इति प्रत्ययं बाधं मन्यन्ते। अत एव **भाष्ये** प्रागुत्पत्तेरव्याकृतनामरूपभेदात्मभूतं जगदासीदिति जगतः कारणात्मना सत्तैवोक्ता न तु बाध इति। न च सृष्टेः प्राक्कालाभावेनाग्र इति कथं कालसम्बन्धयोग इति वाच्यम्। प्राक्काले घटशरावादिकं मृदेवाऽऽसीदित्यादिवाक्येषु कालसम्बन्धेनैव बोधनस्य व्युत्पन्नत्वेनेहापि तथैव बोधयितुं कालसम्बन्धारोपोपपत्तेः। यथा देवदत्तस्य शिर इत्यादावावयवावयविभेदेन बोधनस्य दृष्टत्वेन राहोः शिर इत्यादावपि तत्कल्पनम्। यथा वा पूर्वकालेऽपि काल आसीदित्यादौ कालान्तरसम्बन्धारोपणं तद्वत्। **दीपिकायां** तु पररीत्या परो बोधनीय इति न्यायेन परमते कालस्य नित्यत्वेन प्रागपि सत्त्वात्तद्रीत्या कालसम्बन्ध उक्त इत्युक्तम्। न चाऽऽत्मा वा आसीदिति सत्तावैशिष्ट्यमेव प्रतीयते कर्तुः क्रियाश्रयत्वादिति वाच्यम्। सविता प्रकाशत इत्यादौ कर्तृवाचिप्रत्ययस्य साधुत्वमात्रार्थत्वेन सवितुः प्रकाशरूपत्वप्रत्ययवदात्मन एव सद्रूपत्वप्रतीतेः। अतिरिक्तसत्ताजात्यभावाच्च। अन्यथा सत्ताऽऽसीदित्यादावगतेरिति सर्वं सुस्थम्।

एवं सूत्रितमात्मनोऽखण्डैकरसत्वं साधयितुमुपक्षिप्तं प्रपञ्चस्य मृषात्वं तदध्यारोपापवादाभ्यां दृढीकर्तुमध्यायशेषः। तत्राप्यध्यारोपार्थं स जातो भूतानीत्यतः प्राक्तनस्तदादिरपवादार्थः। तत्रापि वाचारम्भणन्यायेनाऽऽत्मातिरिक्तस्य विकारत्वेन मृषात्वं वक्तुं सृष्टिवाक्यम्। तत्र स्रष्टुरात्मनः सम्भावितं चेतनत्वं दृढीकर्तुमीक्षणमाह—**स सर्वज्ञेति**। नन्वेकस्याखण्डस्य कथमीक्षणं साधनाभावादित्याशङ्क्य न तस्य साधनापेक्षेत्यभिप्रेत्यैकः सन्नपि सर्वज्ञस्वाभाव्यादीक्षतेत्युक्तम्। अत्राऽऽडागमाभावश्छान्दसः। इममेवाभिप्रायं शङ्कापरिहाराभ्यां स्पष्टीकरोति—**नन्विति**। तत्र करणानीन्द्रियाणि कार्यं शरीरमिति विवेकः। तद्रहितस्यापि सार्वज्ञ्ये श्रुतिमाह—**तथा चेति**। अपादो जवनोऽपाणिर्ग्रहीतेत्यन्वयः। पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति मन्त्रशेषः। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव

स इमाँल्लोकानसृजत । अम्भो मरीचीर्मरमापोऽदोऽम्भः

एवमीक्षित्वाऽऽलोच्य स आत्मेमाँल्लोकानसृजत सृष्टवान् । यथेह बुद्धिमांस्तक्षादिरेवंप्रकारान्प्रासादादीन्सृजे इतीक्षित्वेक्षानन्तरं प्रासादादीन्सृजति तद्वत् । ननु सोपादानस्तक्षादिः प्रासादादीन्सृजतीति युक्तं; निरुपादानस्त्वात्मा कथं लोकान्सृजतीति ? नैष दोषः । सलिलफेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृत-फेनस्थानीयस्य जगत उपादानभूते सम्भवतः । तस्मादात्मभूतनामरूपोपादानभूतः सन्सर्वज्ञो जगन्निर्मिमीत इत्यविरुद्धम् । अथवा, यथा विज्ञानवान्मायावी निरुपादान आत्मानमेवाऽऽत्मान्तरत्वेनाऽऽकाशेन गच्छन्तमिव निर्मिमीते तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवाऽऽत्मान्तरत्वेन जगद्रूपेण निर्मिमीत इति युक्ततरम् । एवं च सति कार्यकारणोभयासद्वाद्यादिपक्षाश्च न प्रसज्यन्ते सुनिराकृताश्च भवन्ति । ५

श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिरादिशब्दार्थः । ननु स्वाभाविकनित्यचैतन्येन कथं कादाचित्केक्षणमिति । अत्र केचित्सर्गादौ प्राणिकर्मभिरेका सृज्याकाराऽविद्यावृत्तिरुत्पद्यते । तस्यामात्मचैतन्यं प्रतिबिम्बते तदेवेक्षणं तच्चाऽऽदिकार्यत्वात्स्वपरनिर्वाहकमिति न तत्रापीक्षणान्तरापेक्षा सर्वैरपि प्रथमकार्येऽनवस्थापरिहारायैवमेव वक्तव्य-मित्याहुः । अपरे तु प्राणिकर्मवशात्सृष्टिकालेऽभिव्यक्त्युन्मुखीभूतानभिव्यक्तनामरूपावच्छिन्नं सत्स्वरूपचैतन्य-मेवौन्मुख्यस्य कादाचित्कत्वात्कादाचित्कमीक्षणमित्याहुः । अन्ये त्वीक्षणवाक्यस्य कारणस्याचैतन्यव्यावृत्तिपरत्वा-दीक्षणे तात्पर्याभावाच्च न तत्र भूयानाग्रहः कर्तव्य इत्याहुः । नुशब्दो वितर्कार्थ इति मनसि निधायाऽऽह—**न्विति** । लोडर्थस्य विध्यादेः स्वात्मन्यसम्भवाल्लोटो लडर्थत्वमाह—**सृज इति** । अहमितीत्यस्येक्षतेति पूर्वेणान्वयः । १५

ईक्षणस्य पूर्वकालीनत्वं वदन्सृष्टिहेतुत्वमाह—**एवमिति** । अत्रेक्षणपूर्वकसृष्ट्युक्तेः प्रयोजनं स्रष्टुश्चेतनत्व-सिद्धिरेवेत्यभिप्रेत्य तथाविधस्य तक्ष्णश्चेतनत्वमुदाहरति—**यथेति** ।

नन्वीक्षितुस्तक्षादेर्दार्वाद्युपादानकारणसहितत्वात्प्रासादादिस्रष्टृत्वं युक्तम् । इह त्वात्मा वा इदमेक एवेत्युक्तस्याद्वितीयत्वेनोपादानकारणान्तराभावात्स्रष्टृत्वं न युक्तमिति शङ्कते—**नन्विति** । न च बहु स्यां प्रजायेय तदाऽऽत्मान॑ स्वयमकुरुतेति श्रुत्याऽऽत्मन एवोपादानत्वान्नोपादानान्तरापेक्षेति वाच्यम् । वियदादेर्व्यावहारिकत्वेन २० घटादिवत्परिणामित्वात्तस्य परिणाम्युपादानं वक्तव्यम् । न चाऽऽत्मा तथा भवितुमर्हति । तस्य निरवयवत्वेना-परिणामित्वादिति भावः । तत्र वियदादेः परिणामत्वमङ्गीकृत्य तत्रानभिव्यक्तनामरूपावस्थं बीजभूतमव्याकृतं तद्धेदं तर्ह्यव्याकृतमासीत्तम आसीत्, मायां तु प्रकृतिं विद्यादित्यादिश्रुतिसिद्धं परिणाम्युपादानमस्तीत्याह— **नैष इति** । आत्मभूत इत्यनेनानभिव्यक्तनामरूपशब्दिताव्याकृतस्याऽऽत्मन्यध्यस्तत्वेन परिणममानाविद्याधिष्ठान-त्वेनाऽऽत्मनो विवर्तोपादानत्वं तयोरात्ममात्रत्वेन मृषात्वादात्मनोऽद्वितीयत्वं च न विरुध्यत इति दर्शयति— २५ **नामरूपे इति** । तदाश्रयमव्याकृतमित्यर्थः ।

इदानीं घटादिष्वपि विवर्ततैव परिणामो नाम विवर्तादन्यो नास्त्येव विवर्त इति परिणाम इति च पर्याय इत्यारम्भणाधिकरणन्यायेन विवर्ततया सिद्धे विकारेऽप्यात्मकृतेः परिणामादिति सूत्रकारेण परिणामशब्दप्रयोगाच्च सिद्धं तत्र च सत एवोपादानत्वम् । माया तु सहायमात्रमित्यभिप्रेत्याऽऽत्मनि चैवं विचित्राश्च हीति सूत्रावष्टम्भेन परिहारान्तरमाह—**अथवेति । विज्ञानवानिति** । आकाशेन गच्छन्तमिव स्थितमात्मान्तरं स्रक्ष्यामीति ज्ञानवानित्यर्थः । ३० इदं च विशेषणमीक्षणस्य स्रष्टृत्वस्य च शुक्तिरजतादौ विवर्तेऽदर्शनात्कार्यस्य तत्तुल्यत्वेन तदुभयं न स्यादिति शङ्कानिरासार्थं तन्निरासश्च मायाविनिर्मिते विवर्ते तदुभयदर्शनादिति । **निरुपादान इति** । स्वव्यतिरिक्तोपादान-रहित इत्यर्थः । सर्वशक्तित्वे हेतुमाह—**महामाय इति । आत्मान्तरत्वेनेति** । आत्मभिन्नत्वेनेत्यर्थः । **युक्ततरमिति** । इन्द्रो मायाभिः पुरुरूप ईयते, मायया ह्यन्यदिव भवति बहु स्यां प्रजायेय वाचाऽऽरम्भणं विकारः अपागादग्नेरग्नित्व-मित्यादिबहुश्रुतिसम्मतत्वादित्यर्थः । **एवं च सतीति** । सत एवाऽऽत्मनः कार्यकारणरूपेणावस्थानाङ्गीकारान्निर्हेतुक- ३५ मेव कार्यमुत्पद्यत इति **यदृच्छावादिनाम्**, असदेव कार्यमुत्पद्यत इति **नैयायिकानाम्** । उभयमप्यसदिति **शून्यवादिनां** पक्षः । आदिशब्देन सदेव कार्यमुत्पद्यत इति **सांख्यादीनां** परिणामपक्ष उक्तः । अत्र पक्षशब्देन तत्तत्पक्षोक्तदोषा लक्ष्यन्ते । तत्रासत्कारणपक्षे दध्याद्यर्थिनां दुग्धाद्यन्वेषणं न स्यादिति दोषः । असत्कार्यपक्षे त्वसतः सत्त्वापत्तिः शशविषाणादेरप्युत्पत्तिप्रसङ्गश्च दोषः । परिणामवादे च तस्य पूर्वमेव कारणे सत्त्वात्कुलालादिकारकव्यापारादि-

परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः ॥२॥
स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति । सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥३॥

अम्भो मरीचीर्मरमाप इति। आकाशादिक्रमेणाण्डमुत्पाद्याम्भःप्रभृतीँल्लोकानसृजत। तत्राम्भःप्रभृतीन्स्वयमेव व्याचष्टे श्रुतिः। अदस्तदम्भःशब्दवाच्यो लोकः परेण दिवं द्युलोकात्परेण परस्तात्सोऽम्भःशब्दवाच्योऽम्भोभरणात्। द्यौः प्रतिष्ठाऽऽश्रयस्तस्याम्भसो लोकस्य। द्युलोकादधस्तादन्तरिक्षं यत्तन्मरीचयः। एकोऽप्यनेकस्थानभेदत्वाद्बहुवचनभाङ्मरीचय इति। मरीचिभिर्वा रश्मिभिः सम्बन्धात्। पृथिवी मरो म्रियन्तेऽस्मिन्भूतानीति या अधस्तात्पृथिव्यास्ता आप उच्यन्त आप्नोतेर्लोकाः। यद्यपि पञ्चभूतात्मकत्वं लोकानां तथाऽप्यब्बाहुल्यादब्नामभिरेवाम्भो मरीचीर्मरमाप इत्युच्यन्ते ॥ २ ॥

सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतांश्चतुरो लोकान्सृष्ट्वा स ईश्वरः पुनरेवेक्षत—इमे न्वम्भःप्रभृतयो वैयर्थ्यं पूर्वमसत्त्वे कारणस्यैवावस्थान्तरापत्तिलक्षणपरिणामत्वानुपपत्तिः। उत्पत्त्यनन्तरमसत्त्वे ततो व्यवहारासिद्धिरपरोक्षत्वानुपपत्तिश्चेति दोषः। उभयासत्त्वे चोभयपक्षोक्तदोषास्ते विवर्तवादे न प्रसज्यन्त इत्यर्थः। यद्वाऽस्माभिर्विवर्तवादस्याङ्गीकारात्परिणामादिपक्षाङ्गीकारे परपक्षाङ्गीकारलक्षणो दोषो भवेदिति यच्छङ्क्यते तन्न सम्भवतीत्याह—**एवं च सतीति। सुनिराकृताश्चेति।** विवर्तवादस्यैव परिग्रहेण पक्षान्तरेषु दोषसूचनाद्द्वितीयात्मनस्तद्विपरीतप्रपञ्चाकारताभिधायिन्या बहु स्यामिति श्रुत्या विवर्तवादस्यैव परिगृहीतत्वेन पक्षान्तराणां श्रुतिबाह्यत्वाच्च ते निराकृता भवन्तीत्यर्थः।

लोकानां भौतिकत्वादण्डान्तर्वर्तित्वाच्च भूतसृष्टितत्पञ्चीकरणाण्डसृष्ट्यनन्तरं तत्सृष्टिरिति गुणोपसंहारन्यायमाश्रित्याऽऽह—**आकाशादीति। स्वयमेव व्याचष्ट इति।** तेषां लोकेष्वप्रसिद्धत्वादित्यर्थः। द्युलोकात्परस्ताद्ये महरादयो लोका यश्च तस्याम्भसो लोकस्याऽऽश्रयो द्युलोकस्ते सर्वेऽम्भःशब्देनोच्यन्ते। वृष्टयम्भसस्तत्र विद्यमानत्वादित्याह—**अद इत्यादिना।** अन्तरिक्षं मरीचय इत्यस्यार्थमाह—**द्युलोकादिति।** मरीचिशब्देन सूर्यकिरणसम्बन्धादन्तरिक्षलोकं लक्षयित्वा तस्यैकत्वेऽपि प्रदेशभेदाद्बहुवचनमित्युक्तम्। इदानीं बहूनां मरीचीनां लक्षकत्वात्तत्कृतं बाहुल्यं गङ्गायां घोष इत्यत्र लक्षकगतस्त्रीत्वमिवेत्याह—**मरीचिभिर्वेति।** न तु मरीचिशब्देनान्तरिक्षलोकस्वीकारे मरीचिसम्बन्धो निमित्तान्तरमुच्यत इति भ्रमितव्यम्। एतद्भिन्नस्य निमित्तान्तरस्य पूर्वमनुक्तत्वेन विकल्पार्थकवाशब्दायोगात्। **आप उच्यन्त इति।** अधोलोकवासिभिर्जीवैराप्यमानत्वादाप्नोतेर्धातोरर्थयोगात्ते लोका आप इत्युच्यन्त इत्यन्वयः। ननूक्तानां लोकानां पञ्चभूतसम्बन्धाविशेषाद्भूतान्तरेण पृथिव्यादिनोपरितनलोका लक्ष्यन्तामन्तरिक्षस्य मरीचिव्यतिरिक्तपदार्थान्तरेण मेघादिनाऽपि सम्बन्धात्तेन स लोकः पृथिव्यास्ततोऽधोलोकानां च मरणाप्तिव्यतिरिक्तगमनादिक्रियान्तरेणापि योगात्क्रियान्तरेण ते लक्ष्यन्तामिति शङ्कते—**यद्यपीति। भूतात्मकत्वमिति।** भूतसम्बन्धित्वमित्यर्थः। इदमुपलक्षणं मेघादिपदार्थान्तरसम्बन्धोऽपि वर्तत इत्यपि द्रष्टव्यम्। अम्भआदीनामेव तेषु लोकेषु प्राचुर्यात्तैरेव ते लोका लक्षणीयाः प्राचुर्येण व्यपदेशा भवन्तीति न्यायादिति परिहरति-**तथाऽपीति।** अब्बाहुल्यादित्युपलक्षणं मरीच्यादीनामपि बाहुल्यादित्यपि द्रष्टव्यम्। अब्नामभिरित्यत्रापि मरीच्यादिनामभिरित्यपि द्रष्टव्यम्। यथाश्रुतेऽबात्मकत्वेनाम्भआदिशब्दलक्षकत्वानुक्तेर्लोकानां शङ्कानुपपत्तेर्मरीच्यादीनामब्नामत्वाभावादप्शब्दस्याप्याप्तिक्रियार्थत्वोक्तेरब्नामत्वाभावेनाब्नामभिरिति परिहारानुपपत्तेश्चेति। उपरितनलोकाद्वृष्टिद्वारेणाऽऽगतमम्भ एवास्माभिः साक्षादुपलभ्यते न तु भूतान्तरमित्यस्मद्दृष्ट्याऽब्बाहुल्यमुपरितनलोकानामूर्ध्वलोकगामिप्राण्यपेक्षयाऽधोलोकगामिनां प्राणिनां पुराणेषु बाहुल्योक्तेर्बहुभिराप्यन्तेऽधोलोका इत्यधोलोकेषु तत्कर्तृकाप्तेरपि बाहुल्यं पृथिव्यामतिशीघ्रं प्राणिनां मरणात्तस्यापि तत्र बाहुल्यमन्तरिक्षस्य तु मरीचिबाहुल्यं प्रसिद्धमेवेति ज्ञेयम्। **अम्भो मरीचीर्मरमाप इत्युच्यन्त इति।** एतैर्नामभिरुच्यन्त इत्यन्वयः।

अत्र "आत्मा वा" इत्युक्तात्मज्ञानेन संसारी मोचयितव्यत्वेन विवक्षितः। असंसारिणो मोक्षानुपपत्तेः। संसारश्च संसरणाधिकरणलोकांस्तदुपाधिभूतं लिङ्गशरीरं तदभिमानिनो देवांस्तदधिष्ठानं स्थूलशरीरं संसाररूपाशनायादींस्तदभिमानिनं तद्भोक्तारमन्तरेण नोपपद्यत इति तस्य सर्वस्य सृष्टिम् "अयमात्मा ब्रह्म" इत्यन्तेन ग्रन्थेन क्रमेण वक्ष्यन्संसरणाधिष्ठानलोकसृष्टिमुक्त्वा तत्पालयितृदेवतासृष्ट्युक्तिव्याजेन समष्टिस्थूलशरीरस्य समष्टिलिङ्गशरीरस्य तदभिमानिनां देवानां च सृष्टिं वक्तुमारभते—**स ईक्षतेति।** तद्व्याचष्टे—**सर्वप्राणीति।** फलस्य तदुपादानस्य

तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाऽण्डम् । मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतोरेतस आपः ॥४॥ ५

इति प्रथमाध्याये प्रथमः खण्डः

मया सृष्टा लोकाः परिपालयितृर्वर्जिता विनश्येयुः । तस्मादेषां रक्षणार्थं लोकपालाँल्लोकानां पालयितॄन्नु सृजै सृजेऽहमिति । सोऽद्भ्य एवाप्प्रधानेभ्य एव पञ्चभूतेभ्यो येभ्योऽम्भःप्रभृतीन्सृष्टवान्स्तेभ्य एवेत्यर्थः । पुरुषं पुरुषाकारं शिरःपाण्यादिमन्तं समुद्धृत्याद्भ्यः समुपादाय, मृत्पिण्डमिव कुलालः पृथिव्या, अमूर्छयन्मूर्छितवान् संपिण्डितवान् स्वावयवसंयोजनेनेत्यर्थः ॥ ३ ॥ १०

तं पिण्डं पुरुषविधमुद्दिश्याभ्यतपत् । तदभिध्यानं सङ्कल्पं कृतवानित्यर्थः । "यस्य ज्ञानमयं तपः" इत्यादिश्रुतेः । तस्याभितप्तस्येश्वरसङ्कल्पेन तपसाऽभितप्तस्य पिण्डस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत । यथा पक्षिणोऽण्डं निरभिद्यतैवम् । तस्मान्निर्भिन्नान्मुखाद्वाक्करणमिन्द्रियं निरवर्तत तदधिष्ठाताऽग्निस्ततो वाचो लोकपालः । तथा नासिके निरभिद्येताम् । नासिकाभ्यां प्राणः प्राणाद्वायुरिति सर्वत्राधिष्ठानं करणं देवता च त्रयं क्रमेण निर्भिन्नमिति । अक्षिणी कर्णौ त्वग्हृदयमन्तःकरणाधिष्ठानं मनोऽन्तःकरणं नाभिः सर्वप्राणबन्धनस्थानम् । तस्मादपान- १५
संयुक्तत्वादपान इति पाय्विन्द्रियमुच्यते । तस्याधिष्ठात्री देवता मृत्युः । यथाऽन्यत्र तथा शिश्नं निरभिद्यत प्रजननेन्द्रियस्थानमिन्द्रियं रेतो रेतोविसर्गार्थत्वात्सह रेतसोच्यते आप रेतस इति ॥ ४ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्कृतावैतरेयोपनिषद्भाष्ये प्रथमाध्याये प्रथमः खण्डः

तत्साधनस्य चाधिष्ठानभूतानित्यर्थः । अव्ययानामनेकार्थत्वान्नुशब्दस्तुशब्दार्थं वैलक्षण्यं लोकानामाहेत्याह— इमे न्विति । अहमितीत्यस्येक्षतेति पूर्वेणान्वयः । २०

समष्टिलिङ्गशरीरस्य तदभिमानिनां विराडवयवजन्यत्वात्तदर्थं विराट्सृष्टिमाह—एवमीक्षित्वेति । यद्यपि लोकोत्पत्तेः पूर्वमेवाण्डोत्पत्तिरुक्ता "अण्डमुत्पाद्याम्भःप्रभृतीँल्लोकानसृजते"ति भाष्येण तथाऽपि सैवोत्पत्तिरिहानूद्यते लोकपालसृष्ट्यर्थमिति न विरोध इति भावः । अद्भ्य एवेत्येवकारार्थमाह—येभ्य इति । कुलालः पृथिव्याः सकाशान्मृत्पिण्डमिवेत्यन्वयः । स्वावयवेति । भूतानां परस्परावयवसंयोजनमतिश्लिष्टसंयोगस्तेनेत्यर्थः ।

विराडुत्पत्तिमुक्त्वा तदवयवेभ्यो लोकपालोत्पत्तिमाह—तं पिण्डमित्यादिना । तपःशब्देनाभिध्यानशब्दितं २५
ज्ञानमुच्यते न कृच्छ्रादीत्यत्र श्रुतिमाह—यस्येति । यस्य तपो ज्ञानमेव न कृच्छ्रादीत्यर्थः ।

ततो वाचो लोकपालोऽग्निर्वागधिष्ठाता निरवर्ततेत्यन्वयः । यद्यपि वागादिकरणजातमपञ्चीकृतभूतकार्यं न मुखादिगोलककार्यं तथाऽपि मुखाद्याश्रये तदभिव्यक्तेर्मुखाद्वागित्युक्तम् । नासिकाभ्यां प्राण इत्यत्र प्राणशब्देन प्राणवृत्तिसहितं घ्राणेन्द्रियमुच्यते । अधिष्ठानमिति । गोलकमित्यर्थः । त्वग्गोलकम् । लोमेति लोमसहचरितं स्पर्शनेन्द्रियमुच्यते । ओषधिवनस्पतय इत्योषध्याद्यधिदेवता वायुरुच्यते । "चित्तं तु चेतो हृदयं" "हृदयङ्गं चाहृदयङ्गं चे"त्यादौ हृदय- ३०
शब्दस्यान्तःकरणार्थत्वदर्शनान्मनःशब्देनापि तस्यैवाभिधाने पौनरुक्त्यमित्यत आह—हृदयमिति । अन्तःकरणाधिष्ठानं हृदयकमलमुच्यत इत्यर्थः । सर्वप्राणबन्धनस्थानमिति । गुदमूलमित्यर्थः । अपानशब्देन पाय्विन्द्रियलक्षणायां सम्बन्धमाह—अपानेति । ननु शिश्नं निरभिद्यतेति पर्याये शिश्नरेतसोरुत्पत्त्यभिधाने स्त्रीयोन्यादेरुत्पत्तिरनुक्ता स्यादित्याशङ्क्य शिश्नशब्देनोपस्थेन्द्रियस्थानं लक्ष्यते रेत इति तद्विसर्गार्थत्वेन तत्सहितमुपस्थेन्द्रियमप्शब्देन तल्लक्षित- ३५
पञ्चभूतोपाधिकः प्रजापतिश्चोच्यत इत्याह—यथेति । यथाऽन्यत्र पर्यायान्तरे स्थानं करणं देवता चेति त्रयमुक्तमेवमिहापि शिश्नादिशब्दैस्त्रयमप्युच्यत इत्यर्थः । रेत इति । इन्द्रियमुच्यत इत्यन्वयः । तल्लक्षणायां सम्बन्धमाह—सह रेतसेति । रेतसा सहितं तत्सम्बद्धमित्यर्थः । सम्बन्धमुपपादयति—रेतोविसर्गार्थत्वादिति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचितायामैतरेयोपनिषद्भाष्यटीकायां प्रथमाध्याये प्रथमः खण्डः

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन् । तमशनापिपासाभ्यामन्ववार्जत् ।
ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ॥१॥

ता एता अग्न्यादयो देवता लोकपालत्वेन सङ्कल्प्य सृष्टा ईश्वरेणास्मिन्संसारार्णवे संसारसमुद्रे महत्यविद्याकामकर्मप्रभवदुःखोदके तीव्ररोगजरामृत्युमहाग्राहेऽनादावनन्तेऽपारे निरालम्बे विषयेन्द्रियजनितसुखलवलक्षणविश्रामे पञ्चेन्द्रियार्थतृष्मारुतविक्षोभोत्थितानर्थशतमहोर्मौ महारौरवाद्यनेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे सत्यार्जवदानदयाऽहिंसाशमदमधृत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपे सत्सङ्गसर्वत्यागमार्गे मोक्षतीरे एतस्मिन्महत्यर्णवे प्रापतन्पतितवत्यः ।

तस्मादग्न्यादिदेवताप्ययलक्षणाऽपि या गतिर्व्याख्याता ज्ञानकर्मसमुच्चयानुष्ठानफलभूता, साऽपि नालं संसारदुःखोपशमायेत्ययं विवक्षितोऽर्थोऽत्र । यत एवं, तस्मादेवं विदित्वा, परं ब्रह्माऽऽत्माऽऽत्मनः सर्वभूतानां च, यो वक्ष्यमाणविशेषणः प्रकृतश्च जगदुत्पत्तिस्थितिसंहारहेतुत्वेन, सर्वसंसारदुःखोपशमनाय वेदितव्यः । तस्मात् "एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं" यदेतत्परब्रह्मात्मज्ञानम् । "नान्यः पन्था विद्यतेऽयनाय" इति मन्त्रवर्णात् ।

तं स्थानकरणदेवतोत्पत्तिबीजभूतं पुरुषं प्रथमोत्पादितं पिण्डमात्मानमशनायापिपासाभ्यामन्ववार्जदनु-

एवं समष्टीनामिन्द्रियाणां तदभिमानिदेवतानां चोत्पत्तिमुक्त्वाऽथ तासां देवतानां भोगयोग्यालपव्यष्टिदेहसृष्टिं तेषु देवतानां भोगार्थं व्यष्टिरूपेण प्रवेशं च विवक्षुस्तदुपोद्घातत्वेन क्षुत्पिपासयोः सृष्टिं दर्शयति—**ता एता इति** । तच्छब्दार्थमाह—**अग्न्यादय इति** । एतच्छब्दार्थमाह—**लोकपालत्वेनेति** । अशनायादिसृष्टच्युपयोगित्वेनैतासां स्वरूपाज्ञानपूर्वकं संसारे ब्रह्माण्डरूपे पतिततत्वमासक्तत्वं तन्मात्रत्वाभिमानेन यद्बद्धत्वं तदाह—**अस्मिन्निति** । अर्णवसादृश्यमाह—**अविद्येत्यादिना** । अविद्यादिप्रभवं दुःखमेव दुष्प्रवेशनगुणेनोदकमिवोदकं यस्मिंस्तीव्ररोगादय एव भयङ्करत्वेन ग्राहा नक्रादयो यस्मिंस्तत्त्वज्ञानमन्तरेण विनाशाभावादनन्तेऽज्ञानामुत्तरावध्यभावेनापारे विश्रामस्थानाभावेन निरालम्बे । समीचीनविश्रमस्थानाभावेऽपि तदाभासोऽस्तीत्याह—**विषयेन्द्रियेति** । विषयेन्द्रियसम्बन्धजनितसुखलेशरूपो विश्रामो यस्मिन्पञ्चेन्द्रियाणामर्थेषु विषयेषु शब्दादिषु या तृट् तृष्णा सैव मारुतस्तत्कृतो यो विक्षोभस्तेनोत्थितान्यनर्थशतानि विषयसम्पादनादिनानाक्लेशास्त एवोर्मयो यस्मिन्महारौरवादय एवानेके निरया नरकविशेषास्तद्गतानां गर्भवासतन्निष्क्रमणबाल्यादयो मरणान्ता येऽनेके निरया दुःखजनकत्वात्तद्गतानां च यानि हा हेत्यादीनि कूजितानि स्वल्पध्वनय आक्रोशनानि महाध्वनयस्तदुद्भूतो महारवो यस्मिन् । महापातकाद्यनेकनिरयेति पाठे महापातकजन्या निरया इति द्रष्टव्यम् । संसारार्णवस्यैवंभूतत्वे तस्य तरणासम्भावान्मोक्षशास्त्रानर्थक्यमित्याशङ्क्याविवेकिनां तथात्वेऽपि विवेकितां तत्तरणोपायोऽस्तीत्याह—**सत्येति** । सत्यादयो य आत्मगुणास्त एव पाथेयं पथ्यशनं तेन पूर्वज्ञानमेवोडुपं प्लवो यस्मिन् । सत्सङ्गो गुरुसम्पत्तिः सर्वत्यागः संन्यासस्तावेव मार्गो ज्ञानोडुपप्रवृत्तिहेतुर्यस्मिन्मोक्षे सति पुनः संसारार्णवस्पर्शाभावात्स एव तीरवत्तीरं यस्मिन्नेतस्मिन्प्रत्यक्षसिद्धेऽर्णव इत्यर्थः । अत्र पतनं नामाऽऽत्मस्वरूपाज्ञानेन संसारेऽहमभिमानेन सक्तत्वम् ।

ननु संसारार्णवपतितत्वं वक्ष्यमाणाशनायादियोग इत्यादिः सर्वोऽपि बन्धस्तदभिमानिनो जीवस्य वक्तव्यो न देवतानाम् । न च तासामपि तत्राभिमानोऽस्तीति तदुक्तमिति शङ्क्यम् । तथाऽपि प्राधान्यतोऽभिमानिनं जीवं विहायाप्राधान्यतोऽभिमानिनोषु तदुक्तेरभिप्रायो वक्तव्य इत्यत आह—**तस्मादिति** । यस्मात्संसारार्णवपतितत्वं तासां तस्मादित्यर्थः । महारौरवाद्यनेकनिरयगतिरिवेति पाठ उक्तनिरयगतिर्यथा दुःखोपशमाय नालं तथा साऽपि नालमिति पूर्णेनान्वयः । तद्विवक्षाया अपि प्रयोजनमाह—**यत एवमिति । एवं विदित्वेति** । नालमिति विदित्वेत्यर्थः । आत्मनः सर्वभूतानां चाऽऽत्मा य "आत्मा वा इदमि"त्यादिना जगदुत्पत्त्यादिहेतुत्वेन यः प्रकृतः स परं ब्रह्म वेदितव्य इत्यन्वयः । नन्वेष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यमित्युपक्रम्योक्थमुक्थमिति वा इत्यादिना कर्मसम्बन्धिसगुणब्रह्मात्मज्ञानस्यैवोक्तत्वात्तस्यैव मोक्षसाधनत्वं नोक्तकेवलात्मज्ञानमात्रस्येत्याशङ्क्यैष पन्था इत्यादिना ब्रह्मात्मविज्ञानमेवोक्तं न कर्मसमुच्चितं ज्ञानं तस्योक्तवाक्येन संसारहेतुत्वावगमेन सत्यत्वायोगादित्याह—**तस्मादेष पन्था इति** । यस्मात्कर्मसहितस्य प्राणविज्ञानस्य संसारफलत्वं तस्मादेष पन्था इत्यनेन यदेतद्ब्रह्मात्मविज्ञानं तदेवोक्तमित्यन्वयः । "तमेव

ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ।
ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥ २ ॥
ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति ।
पुरुषो वाव सुकृतं ता अब्रवीद्यथायतनं प्रविशतेति ॥ ३ ॥
[1]अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके ५
प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः

गमितवान्संयोजितवानित्यर्थः । तस्य कारणभूतस्याशनायादिदोषवत्त्वात्तत्कार्यभूतानामपि देवतानामशनायादिमत्त्वम् । तास्ततोऽशनायापिपासाभ्यां पीड्यमाना एनं पितामहं स्रष्टारमब्रुवन्नुक्तवत्यः । आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानीहि विधत्स्व । यस्मिन्नायतने प्रतिष्ठिताः समर्था सत्योऽन्नमदाम भक्षयाम इति ॥ १ ॥

एवमुक्त ईश्वरस्ताभ्यो देवताभ्यो गां गवाकृतिविशिष्टं पिण्डं ताभ्य एवाद्भ्यः पूर्ववत्पिण्डं समुद्धृत्य १०
मूर्च्छयित्वाऽऽनयद्दर्शितवान् । ताः पुनर्गवाकृतिं दृष्ट्वाऽब्रुवन् । न वै नोऽस्मदर्थमधिष्ठानायान्नमत्तुमयं पिण्डोऽलं न वै ।
अलं पर्याप्तोऽत्तुं न योग्य इत्यर्थः । गवि प्रत्याख्याते ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति पूर्ववत् ॥ २ ॥

सर्वप्रत्याख्याने ताभ्यः पुरुषमानयत्स्वयोनिभूतम् । ताः स्वयोनिपुरुषं दृष्ट्वाऽखिन्नाः सत्यः सुकृतं शोभनं
कृतमिदमधिष्ठानं बतेत्यब्रुवन् । तस्मात्पुरुषो वाव पुरुष एव सुकृतं सर्वपुण्यकर्महेतुत्वात् । स्वयं वा स्वेनैवाऽऽत्मना १५
स्वमायाभिः कृतत्वात्सुकृतमुच्यते । ता देवताः ईश्वरोऽब्रवीदिष्टमासामिदमधिष्ठानमिति मत्वा सर्वे हि स्वयोनिषु
रमन्ते । अतो यथायतनं यस्य यद्वदनादिक्रियायोग्यमायतनं तत्प्रविशतेति ॥ ३ ॥

तथाऽस्त्वित्यनुज्ञां प्रतिलभ्येश्वरस्य नगर्यामिव बलाधिकृतादयोऽग्निर्वागभिमानी वागेव भूत्वा स्वां योनिं

विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यनेनापि केवलात्मविज्ञानव्यतिरिक्तपथनिषेधादप्युक्तमेव ज्ञानं पन्था इत्याह—**नान्य इति** । एष पन्था इति ब्रह्मात्मज्ञानमुपक्रम्य मध्ये प्राणविज्ञानोक्तिस्तु प्राणोपासनया चित्तैकाग्र्ये सति तत्फलाच्च वैराग्ये सत्येष पन्था इत्युपक्रान्तं मुख्यं ज्ञानं वक्तुं शक्यमित्यभिप्रायेणेति भावः । २०
यद्यप्येतद्वाक्यव्याख्यानावसरे कर्ममार्गोऽपि पथिशब्दार्थत्वेनोक्तस्तथाऽपि ज्ञानमार्गोपायत्वेन स उक्तो न प्राधान्येनेति भावः । ननु पिण्डस्याशनायादियोगे देवतानां कथं तद्वत्त्वं येन तासामन्नादनार्थमायतनप्रश्नः स्याद्यस्मिन्प्रतिष्ठिता इत्यनेनेत्यत आह—**तस्येति** ।

पितामहमिति । स्वजनकपिण्डजनकमित्यर्थः । **अधिष्ठानमिति** । शरीरमित्यर्थः । ननु विराड्देह एवाऽऽयतनं वर्तत इत्याशङ्क्य तस्यातिप्रौढत्वात्तमापूर्यं तत्र स्थातुं वयमसमर्था अन्नं च तद्देहपर्याप्तं सम्पादयितुमसमर्था २५
अतोऽस्मद्योग्यं व्यष्टिदेहं सृजस्वेत्युक्तवत्य इत्याह—**यस्मिन्निति** । यद्यप्यस्मदादिव्यष्टिदेहं विनाऽपि चरुपुरोडाशादिहविरदनमस्ति तथाऽपि तदपि हविरदनं व्यष्टिदेवतादेहमन्तरा नास्तीति भावः । व्यष्टिदेहसृष्टिमाह—**ताभ्य इति** । **मूर्छयित्वेति** । निबिडतया परस्परावयवसंयोजनेन सृष्ट्वेत्यर्थः । **न योग्य इति** । गोशरीरस्योपरिदन्तानामभावेन दूर्वादिमूलस्योत्खातुमशक्यत्वादित्यर्थः । **अश्वमिति** । तस्योभयतोदन्तत्वेनोक्तदोषाभावादित्यर्थः । **न वै नोऽयमलमिति** । अश्वस्यापि विवेकज्ञानाभावादयोग्यत्वादित्यर्थः । ३०

गवाश्वग्रहणस्य सर्वतिर्यग्देहोपलक्षकत्वमभिप्रेत्योक्तम्—**सर्वेति** । **स्वयोनिभूतमिति** । स्वयोनिभूतविराट्पुरुषदेहसजातीयमित्यर्थः । यस्मात्स्वकीयपरितोषद्योतकेन सुकृतं बतेत्यनेन शब्देन पुरुषदेहमुक्तवत्यस्तस्मात्तस्येदानीमपि सुकृतत्वमित्याह—**तस्मादिति** । **स्वयं वेति** । ईश्वरेण स्वेनैव कृतं भृत्यादिकृतापेक्षया सुकृतं सुष्ठु कृतमित्यर्थः । पृषोदरादित्वात्स्वयमितिस्थाने सुशब्द इत्यर्थः । एवं व्यष्टिदेहसृष्टिमुक्त्वा तत्र करणानां देवतानां च व्यष्टिरूपेण प्रवेशमाह—**ता देवता इति** । इष्टत्वे हेतुमाह—**सर्वे होति** । **आयतनमिति** । गोलकरूपं स्थानमित्यर्थः । ३५

---

१. अत्र ब्रह्मसूत्रद्वितीयाध्यायचतुर्थपादे विचारितम्—किं प्रकृताः प्राणाः इन्द्रियाणि स्वमहिम्नैव स्वस्मै

श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो
लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो
भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं
प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥ ४ ॥
तमशनायापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ।
ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु
भागिन्यौ करोमीति । तस्माद्यस्यै कस्यै च देवतायै
हविर्गृह्यते भागिन्यावेवास्यामशनायापिपासे भवतः ॥ ५ ॥

इति प्रथमाध्याये द्वितीयः खण्डः

मुखं प्राविशत्तथोक्तार्थमन्यत् । वायुर्नासिके आदित्योऽक्षिणी दिशः कर्णावोषधिवनस्पतयस्त्वचं चन्द्रमा हृदयं मृत्युर्नाभिमापः शिश्नं प्राविशन् ॥ ४ ॥

एवं लब्धाधिष्ठानासु देवतासु निरधिष्ठाने सत्यावशनायापिपासे तमीश्वरमब्रूतामुक्तवत्यावावाभ्यामधिष्ठानमभिप्रजानीहि चिन्तय विधत्स्वेत्यर्थः । स ईश्वर एवमुक्तस्ते अशनायापिपासे अब्रवीत् । न हि युवयोर्भावरूपत्वाच्चेतनावद्वस्त्वनाश्रित्यान्नात्तृत्वं सम्भवति । तस्मादेतास्वेवाग्न्याद्यासु वां युवां देवतास्वध्यात्माधिदेवतास्वाभजामि वृत्तिसंविभागेनानुगृह्णामि । एतासु भागिन्यौ यद्देवत्यो यो भागो हविरादिलक्षणः स्यात्तस्यास्तेनैव

राज्ञोऽनुज्ञां प्रतिलभ्य बलाधिकृतादयः सेनापत्यादयो नगर्यां यथा प्रविशन्ति तद्वदीश्वरस्यानुज्ञां प्रतिलभ्याग्निः प्राविशदित्यन्वयः। यद्यपि वागभिमान्यग्निर्न तु वागेव तथाऽपि तस्य वाचं विना प्रत्यक्षमनुपलब्धेस्तस्या अपि देवतां विना स्वविषयग्रहणसामर्थ्याभावात्तयोरेकलोलीभावेनाभेदोक्तिरित्याह—**वागेवेति** । यद्यपि देवतानामेवेश्वरेण प्रवेशश्चोदितस्तथाऽपि करणैर्विना तासां साक्षाददनादिभोगासम्भवात्तेषामपि प्रवेशोऽर्थाच्चोदित एवेति तेषामपि स उक्तः ।

अशनायापिपासयोरपि व्यष्टिदेहेऽपि करणाधिष्ठातृदेवतासम्बन्धं वक्तुं तयोः प्रश्नमवतारयति—**एवमिति** । निरधिष्ठाने सत्याविति कारणीभूते विराड्देहेऽधिष्ठानविशेषो यदि स्यादशनायापिपासयोरग्न्यादीनां मुखादय इव तदा व्यष्टिदेहेऽपि तदेव स्यात्तयोरधिष्ठानं तेषामिव न त्वेतदस्ति । अतो निरधिष्ठाने ते इत्यर्थः । विधत्स्वेत्यनन्तरं यस्मिन्प्रतिष्ठिते अन्नमदावेति शेषः । तत्राधिष्ठानविशेषस्तावद्युवयोः कारणे समष्टिदेहेऽभावादिहापि नास्त्येव कारणपूर्वकत्वात्कार्येऽप्यधिष्ठानस्यादनं तु युवयोर्धर्मरूपत्वाद्धर्मिणमनाश्रित्य धर्मस्य स्वातन्त्र्यायोगाच्चेतनावद्धर्मीभूतदेवतागतमेवान्नादनं युवयोरित्याह—**स ईश्वर इति** । **भावरूपत्वादिति** । धर्मरूपत्वादित्यर्थः । धर्मिणोऽप्यचेतनस्य भोक्तृत्वादर्शनाच्चेतनावद्वस्त्विति युक्तम् । **अध्यात्मेति** । अध्यात्मदेवता व्यष्टिदेहगतदेवता अधिदेवताः समष्टिविराड्देहगता हविर्भोजोऽग्न्यादयः प्रसिद्धास्तास्वित्यर्थः । **वृत्तीति** । भोगैकदेशदानेनेत्यर्थः । एतदेव स्पष्टीकरोति । **एतासु भागिन्याविति** । साक्षाद्देवतासु भागवत्त्वायोगाद्देवताभागेन भागवत्त्वमंशवत्त्वमुक्तमिति व्याचष्टे—**यद्देवत्य इति** । यद्देवत्यो यद्देवतासम्बन्धी यो भागः स्यात्तस्या देवतायाः सम्बन्धिना तेनैव भागेनेत्यर्थः । हविरादीत्यादिशब्देन तत्तादन्द्रियविषयोऽपि गृह्यते । करोमीत्यनन्तरमुक्त्वेति शेषः । उक्तमर्थमिदानींतनव्यवहारेण दृढीकर्तुं

स्वस्मै कार्याय प्रभवन्ति उत तत्तदभिमानिदेवताधिष्ठिता प्रभवन्ति इति संदिह्य तेषां स्वकार्यशक्तियोगात् स्वमहिम्नैव प्रभवन्तीति प्राप्ते सिद्धान्तः—ज्योतिराद्यधिष्ठानं तु तदामननात् (ब्र. सू. २.४.१४) इति । अयमर्थः—ज्योतिरादिभिः अग्न्याद्यभिमानिदेवताभिः अधिष्ठितं वागादिकरणजातं स्वकार्येषु प्रवर्तते । तदामननात् । "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इति । अग्नेश्चायं वाग्भावः मुखे प्रवेशश्च देवतात्मनोऽधिष्ठातृत्वमङ्गीकृत्योच्यते । देवतासम्बन्धं विना अग्नेर्वाचि सम्बन्धाभावात् मुखे प्रवेशस्य असम्भवदुक्तिकत्वाच्चेति ।

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥ १ ॥
सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत । या वै सा मूर्तिरजायतान्नं वै तत् ॥ २ ॥

भागेन भागिन्यौ भागवत्यौ वां करोमीति सृष्ट्वादावीश्वर एवं व्यदधाद्यस्मात्तस्मादिदानीमपि यस्यै कस्यै च देवतायै देवताया अर्थाय हविर्गृह्यते चरुपुरोडाशादिलक्षणं भागिन्यावेव भागवत्यावेवास्यां देवतायामशनायापिपासे भवतः ॥ ५ ॥ ५

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्कृतावैतरेयोपनिषद्भाष्ये
प्रथमाध्याये द्वितीयः खण्डः

स एवमीश्वर ईक्षत। कथम्? इमे नु लोकाश्च लोकपालाश्च मया सृष्टा अशनायापिपासाभ्यां च संयोजिताः। अतो नैषां स्थितिरन्नमन्तरेण तस्मादन्नमेभ्यो लोकपालेभ्यः सृजै सृज इति। एवं हि लोक ईश्वराणामनुग्रहे निग्रहे च स्वातन्त्र्यं दृष्टं स्वेषु तद्वन्महेश्वरस्यापि सर्वेश्वरत्वात्सर्वान्प्रति निग्रहानुग्रहेऽपि स्वातन्त्र्यमेव ॥ १ ॥ १०

स ईश्वरोऽन्नं सिसृक्षुस्ता एव पूर्वोक्ता अप उद्दिश्याभ्यतपत्। ताभ्योऽभितप्ताभ्य उपादानभूताभ्यो मूर्तिर्घनरूपं धारणसमर्थं चराचरलक्षणमजायतोत्पन्नमन्नं वै तन्मूर्तिरूपं या वै सा मूर्तिरजायत ॥ २ ॥

तस्मादित्यादिवाक्यं तद्व्याचष्टे—**यस्मादिति**। यस्मात्सृष्ट्वादावेवं व्यदधात्तस्मादित्यर्थः। हविर्ग्रहणमुपलक्षणमधिदैवतं हविर्गृह्यतेऽध्यात्मदेवतायै शब्दादिविषयो गृह्यत इति योज्यम्। **भागिन्यावेवेति**। यद्यपि शब्दादिविषयेण हविषा चाग्न्यादिदेवतातृप्तौ तयोर्नाश एव दृश्यते न तु तद्भागेन भागित्वं तथाऽपि तयोः सर्वात्मना नाशे पुनः कालान्तरे ते न स्याताम्। अतः स्वरूपेण स्थितयोरेव तयोः कदाचिदिन्द्रियदेवतानां विषयोन्मुखतया प्रेरकत्वरूपं कार्योन्मुख्यं कदाचित्तदभावरूपोपशान्तिरित्यभ्युपगन्तव्यम्। तथा च हविषा देवतातृप्तावशनायापिपासयोरपि तृप्तिरुपशान्तिर्दृश्यत इति तद्भागेन भागवत्त्वमुक्तमित्यर्थः। न च चक्षुरादिना रूपादिग्रहणदशायामशनायापिपासयोर्न शान्तिर्दृश्यत इति न सर्वत्र भागवत्त्वं तयोरिति शङ्क्यम्। क्षुत्पिपासार्तस्यान्नपानदर्शनश्रवणादिनाऽन्नपानप्रत्यासत्तिपरितोषेण मनसि तृष्णा शान्तेव भाति। न तु यथापूर्वं बाधत इति चक्षुरादिष्वपि तयोर्भागवत्त्वमित्युक्तं **सायणीयदीपिकायाम्**। वस्तुतस्त्वशनायापिपासाशब्देनेन्द्रियाणां स्वस्वविषयगोचरौ तृष्णाकामावुच्येते। अन्नमदामेत्यत्राप्यन्नादनं स्वस्वविषयग्रहणमेव चक्षुरादीन्द्रियदेवतानां मुख्यादनासम्भवात्। तथा च रूपादिविषयग्रहणेन तत्तद्विषयगोचरयोस्तयोः शान्तिरस्तीति सर्वेन्द्रियेष्वपि तयोर्भागवत्त्वं युक्तमिति। न चेन्द्रियदेवतातृप्तिव्यतिरेकेण न तयोः पृथक्तृप्तिर्दृश्यत इति वाच्यम्। इन्द्रियदेवतानां स्वस्वविषयोन्मुखतया प्रेरकत्वरूपकार्योन्मुख्यनिवृत्तिरूपोपशान्तिरेव पृथक्तयोस्तृप्तिरस्तोत्युक्तत्वात्। यद्यप्यर्णवप्रवेशनमशनायादिमत्त्वं तन्निमित्तमन्नादनमित्यादि सर्वं कार्यकरणसङ्घातपञ्जराध्यक्षस्य जीवस्य भोक्तुरेव नेन्द्रियदेवतानामशनायापिपासादि तथाऽपि तस्य वस्तुतोऽभोक्तृब्रह्मभूतस्य स्वतो भोक्तृत्वायोगादिन्द्रियदेवताद्युपाधिकृतमेव तस्य भोक्तृत्वादिसर्वसंसार इति वक्तुं तेष्वेव तमारोप्य श्रुत्योच्यत इति न दोषः। १० १५ २० २५

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यानन्दज्ञानविरचितायामैतरेयोपनिषद्भाष्यटीकायां
प्रथमाध्याये द्वितीयः खण्डः ३०

एवं भोगसाधनसृष्टिमुक्त्वा भोग्यसृष्टिं वक्तुमारभते—**स एवमिति**। नुशब्दोक्तं वितर्कं स्पष्टीकरोति—**लोका इत्यादिना**। पूर्ववल्लोकलोकपालप्रार्थनां विना स्वयमेवान्नं स्रष्टुं वितर्कितवानित्युक्तेः प्रयोजनमीश्वरत्वज्ञापनमित्याह—**एवं हीति**।

अप इति। पञ्चभूतानीत्यर्थः। **अभ्यतपदिति**। एतेभ्यो भूतेभ्यो मनुष्यादीनामन्नभूता व्रीह्यादयो जायन्तां मार्जारादीनामन्नभूतानि मूषकादीनि जायन्तामिति पर्यालोचनं सङ्कल्पं कृतवानित्यर्थः। मूर्तिशब्देन करचरणादिमतोऽभिधाने व्रीह्यादेरग्रहणं स्यादत आह—**घनरूपमिति**। कठिनमित्यर्थः। नन्वमूर्तानामपि वायुचन्द्रकिरणादीनां ३५

तदेनत्सृष्टं पराङत्यजिघांसत्तद्वाचाऽजिघृक्षत्
तन्नाशक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् ॥३॥
तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् ॥४॥
तच्चक्षुषाऽजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुं स यद्धैनच्चक्षुषाऽग्रहैष्यद् दृष्ट्वा हैवान्नमत्रप्स्यत् ॥५॥
तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् ॥६॥
तत्त्वचाऽजिघृक्षत्तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाऽग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत् ॥७॥
तन्मनसाऽजिघृक्षत्तन्नाशक्नोन्मनसा ग्रहीतुं स यद्धैनन्मनसाऽग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत् ॥८॥
तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ॥९॥
तदपानेनाजिघृक्षत्तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥१०॥

तदेनदन्नं लोकलोकपालानामर्थेऽभिमुखे सृष्टं तद्यथा मूषकादिर्मार्जारादिगोचरे सन्मत्स्य मृत्युरन्नाद इति मत्वा परागञ्चतीति पराङ्सदत्तृनतीत्याजिघांसदतिगन्तुमैच्छत्पलायितुं प्रारभतेत्यर्थः। तमन्नाभिप्रायं मत्वा स लोकलोकपालसङ्घातः कार्यकारणलक्षणः पिण्डः प्रथमजत्वादन्यांश्चान्नादानपश्यंस्तदन्नं वाचा वदनव्यापारेणाजिघृक्षद्-ग्रहीतुमैच्छत्तदन्नं नाशक्नोन्न समर्थोऽभवद्वाचा वदनक्रियया ग्रहीतुमुपादातुम्। स प्रथमजः शरीरी यद्यदि हैनद्वाचाऽग्रहैष्यद्गृहीतवान्स्यात्सर्वोऽपि लोकस्तत्कार्यभूतत्वादन्नमभिव्याहृत्य हैवान्नमत्रप्स्यन्नृप्तोऽभविष्यत्। न चैतदस्त्यतो नाशक्नोद्वाचा ग्रहीतुमित्यवगच्छामः पूर्वजोऽपि ॥ ३ ॥

समानमुत्तरम्। तत्प्राणेन तच्चक्षुषा तच्छ्रोत्रेण तत्त्वचा तन्मनसा तच्छिश्नेन तेन तेन करणव्यापारेणान्नं ग्रहीतुमशक्नुवन्पश्चादपानेन वायुना मुखच्छिद्रेण तदन्नमजिघृक्षत्तदावयत्तदन्नमेवं जग्राहाशितवान्। तेन स एषोऽपान-वायुरन्नस्य ग्रहोऽन्नग्राहक इत्येतत्। यद्वायुर्यो वायुरन्नायुरन्नबन्धनोऽन्नजीवनो वै प्रसिद्धं स एष यो वायुः ॥ ४-१० ॥

सर्पादीन्प्रत्यन्नत्वमस्तीति तत्संग्रहार्थमाह—**धारणसमर्थं चेति**। शरीरधारणसमर्थमित्यर्थः। **चरेति**। चरं मूषकाद्य-चरं व्रीह्यादीत्यर्थः। या वै सा मूर्तिरजायतान्नं वै तदिति पूर्वेणान्वयः। तच्छब्दार्थमाह—**मूर्तिरूपमिति**।

शब्दादिभोक्तृत्वमिन्द्रियदेवतोपाधिकं न स्वत आत्मन इत्यभिप्रायेण तेषां शब्दादिभोगमुक्त्वेदानीमन्न-पानभोक्तृत्वमप्यपानवृत्तिमत्प्राणोपाधिकं न स्वत आत्मन इत्यभिप्रायेण तस्याभोक्तृत्वं परिशेषान्निर्धारयितुमाह—**तदेनदिति**। सृष्टं तत्पराङ्सदत्यजिघांसदित्यन्वयः। उक्तार्थे दृष्टान्तमाह—**यथेति**। पराङ्पदं व्युत्पादयति—**परागञ्चतीति**। मत्वेत्यनन्तरं परागञ्चति तद्वदिति शेषः। **अतिगन्तुमैच्छदिति**। यद्यपि व्रीह्याद्यचेतनान्नस्य नैवमिच्छा सम्भवति तथाऽपि भोक्तृशरीरान्तर्नं प्रविष्टं किन्तु बहिरेव स्थितमित्यत्र तात्पर्यम्। कार्यकरणलक्षणः पिण्डस्तदन्नं वाचाऽजिघृक्षदित्यन्वयः। ननिवदानीमिव प्रथममेवापानेनैवान्नजिघृक्षा तस्य किमिति नाऽऽसीदित्या-शङ्क्य तस्येदानीतनशरीरापेक्षया प्रथमजत्वात्तदानीं चापानेनान्नादत्वस्यानिश्चयात्तस्य वागादिनाऽन्नजिघृक्षा युक्तेत्याह—**प्रथमजत्वादिति**। अस्मदाद्यपेक्षयेत्यर्थः। यस्मिन्प्रतिष्ठिता अन्नमदामेत्युपक्रान्तस्य व्यष्टिशरीरस्य समष्टिपिण्डापेक्षया प्रथमजत्वाभावादपश्यन्नजानन्नित्यर्थः। वदनक्रियया प्रथमजस्य पिण्डस्य कारणस्यान्नग्रहणा-सामर्थ्यं कार्यगतासामर्थ्येन द्रढयति—**स प्रथमज इति**। अत्र प्रथममन्नपदं गृहीतवान्स्यादित्यत्र कर्मत्वेन सम्बध्यते। **तत्कार्यभूतत्वादिति**। तदनन्तरभूतत्वादित्यर्थः। इदानींतनशरीरस्य पूर्वकालीनव्यष्टिशरीरकार्यत्वाभावादिति। **अभिव्याहृत्येति**। वाचकशब्देनाभिधायेत्यर्थः। पूर्वजोऽपीत्यस्य नाशक्नोदिति पूर्वेणान्वयः।

प्राणेन घ्राणेनाभिप्राण्याऽऽघ्रायेत्यर्थः। **अपानेनेति**। मुखच्छिद्रेणान्तर्गच्छता वायुनेत्यर्थः। अन्नात्तृत्वमपि श्वसनवृत्तिमतः प्राणस्य धर्मो नाऽऽत्मनः स्वत इत्येतत्तदेनत्सृष्टं पराङित्यादिनोक्तं सन्दर्भस्य प्रयोजनमुपसंहरति—**तेन स एव इति**। येन कारणेनापानेनान्नमशितवांस्तेनेत्यर्थः। अपानवृत्तिमतः प्राणस्यान्नग्राहकत्वं प्रसिद्धया द्रढीकर्तुमन्नायुरिति वाक्यं व्याचष्टे—**अन्नायुरिति**। अन्नमदामेत्यादिश्रुत्यन्तरे प्राणस्यान्नयुष्ट्वं प्रसिद्धमित्यर्थः।

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति। स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥११॥

स एवं लोकलोकपालसङ्घातस्थितिमन्ननिमित्तां कृत्वा पुरपौरतत्पालयितृस्थितिसमां स्वामीवेक्षत—कथं नु केन प्रकारेणेति वितर्कयन्निदं मदृते मामन्तरेण पुरस्वामिनम्। यदिदं कार्यकारणसङ्घातकार्यं वक्ष्यमाणं कथं नु खलु मामन्तरेण स्यात्परार्थं सत्। यदि वाचाऽभिव्याहृतमित्यादि, केवलमेव वाग्व्यवहरणादि, तन्निरर्थकं न कथञ्चन भवेद्बलिस्तुत्यादिवत्। पौरवन्द्यादिभिः प्रयुज्यमानं स्वाम्यर्थं सत्तत्स्वामिनमन्तरेणासत्येव स्वामिनि तद्वत्। तस्मान्मया परेण स्वामिनाऽधिष्ठात्रा कृताकृतफलसाक्षिभूतेन भोक्त्रा भवितव्यं पुरस्येव राज्ञा। यदि नामैतत्संहतकार्यस्य परार्थत्वं परमार्थिनं मां चेतनमन्तरेण भवेत्पुरपौरकार्यमिव तत्स्वामिनम्। अथ कोऽहं किंस्वरूपः कस्य वा स्वामी? यद्यहं कार्यकरणसङ्घातमनुप्रविश्य वागाद्यभिव्याहृतादिफलं नोपलभेय, राजेव पुरमाविश्याधिकृतपुरुषकृताकृतावेक्षणम्, न कश्चिन्मामयं सन्नेवंरूपश्चेत्यधिगच्छेद्विचारयेत्। विपर्यये तु, योऽयं वागाद्यभिव्याहृतादीदमिति

एवं भोगादिकरणभूतानां लोकानां भोगायतनस्य समष्टिव्यष्टिशरीरस्य भोगोपकरणानां वागादीनां समष्टिशरीरे लोकपालत्वेन व्यष्टिशरीरे करणाधिष्ठातृत्वेन च स्थितानां देवतानां भोगे प्रेरकयोरशनायापिपासयोस्तत्प्रयुक्तस्य करणनिष्ठस्य शब्दादिविषयग्रहणलक्षणस्य भोगस्यापानवृत्तिमत्प्राणनिष्ठस्यान्नपानग्रहणलक्षणस्य च भोगस्याऽऽत्मनः संसारित्वसिद्ध्यर्थं सृष्टिमभिधायेदानीं संसारिणं भोक्तारं दर्शयितुं स्रष्टुरीश्वरस्य विचारं दर्शयितुं स ईक्षतेति वाक्यं तद्व्याचष्टे—**स एवमिति**। पुरस्य पौराणां पुरवासिनां तत्पालयितॄणां राजनियुक्ताधिकारिणां स्थितिसमां तत्तुल्यामन्ननिमित्तामन्नाधीनां सङ्घातस्थितिं कृत्वेत्यन्वयः। लोकादीन्सृष्ट्वेत्यपि द्रष्टव्यम्। कृत्वेत्युपलक्षणं पदार्थानुक्त्वा वाक्यार्थमाह—**यदिदमिति। वक्ष्यमाणमिति**। वाचाऽभिव्याहृतमित्यादिना वक्ष्यमाणमभिव्याहरणादिकमित्यर्थः। हेतुर्गर्भितमिदं शब्दार्थस्य विशेषणम्। **परार्थं सदिति**। परार्थत्वात्परमर्थिनं मामृते कथं स्यादित्यस्यैवार्थस्य कथंशब्दसूचितं व्यतिरेकमाह—**यदीति**। केवलं भोक्तृरहितव्यवहरणादि तत्तन्न कथञ्चन भवेत्कथञ्चिदपि न भवेदित्यन्वयः। तत्र हेतुः—**निरर्थकमिति**। अर्थयत इत्यर्थः। पचाद्यच् अर्थयिता पुरुषस्तद्रहितमित्यर्थः। अर्थयिता हि पुरुषः स्वस्य प्रयोजनसिद्ध्यर्थं वागादिकं प्रेरयति। तदभावे प्रेरकाभावाद्वाग्व्यवहारादिकं न भवेदित्यर्थः। यद्वाऽर्थः प्रयोजनमर्थिनोऽभावे तस्यार्थत्वाभावान्निष्प्रयोजनं सत्तन्न भवेत्प्रयोजनप्रयुक्तत्वात्सर्वप्रवृत्तेरिति। तत्र दृष्टान्तः—**बलिस्तुत्यादिवदिति**। एतदेव विवृणोति—**पौरेति**। अत्र यथाशब्दो द्रष्टव्यः। यथा पौरादिभिः प्रयुज्यमानं बलिस्तुत्यादिकं स्वामिनमन्तरेण न भवेत्तद्वदित्यन्वयः। **स्वामिनमन्तरेणेति**। अस्य व्याख्यानमसत्येवेति। विचारस्य फलमाह—**तस्मादिति**। परेणार्थादन्येन स्वामिनाऽर्थिना वागादिव्यवहारकृतोपकारभाजाऽधिष्ठात्रा वागादिप्रेरकेण। अधिष्ठातृत्वं चायस्कान्तवच्चेतनस्य सन्निधानमात्रमेव साक्षितया न व्यापार इत्याह—**कृतेति**। कृताकृतयोस्तत्फलस्य चेत्यर्थः। फलसाक्षित्वमेव भोक्तृत्वमपीत्याह—**भोक्त्रेति**। राज्ञेत्यस्येतिपदाध्याहारेणेक्षतेति पूर्वेणान्वयः।

एवं वाग्व्यवहरणादिकार्यसिद्ध्यर्थं मया प्रवेष्टव्यमित्युक्त्वाऽऽत्मस्वरूपबोधार्थं च मया प्रवेष्टव्यमिति वक्तुं स ईक्षत यदि वाचाऽभिव्याहृतमित्याद्यथ कोऽहमित्यन्तं वाक्यं तत्प्रवेशप्रयोजनकथनार्थत्वेन कथं न्विदमितिवाक्यतुल्यत्वात्स ईक्षत कतरेणेति वाक्येन व्यवहितमपीहैवाऽऽकृष्य व्याचष्टे—**यदि नामेति**। संहतस्य वागादिलक्षणस्य कार्यस्य परार्थत्वं परोपकाररूपाभिव्याहरणादिकारित्वं परार्थिनमुपकारभाजमन्तरेण भवेदित्यर्थः। अनेन यदि वाचैव केवलयाऽभिव्याहृतं भवेदित्येवकाराध्याहारेण वाक्यं योजितम्। एवमुत्तरत्रापि यदि प्राणेनैवाभिप्राणितं भवेदित्यादि द्रष्टव्यम्। अभिप्राणितमाघ्रातमभ्यपानितमन्तर्गतं भक्षितमित्यर्थः। उक्तमेव वाक्यार्थं स्पष्टीकरोति—**यद्यहमित्यादिना**। **अयं सन्निति**। अयमात्माऽस्ति स चैवंरूपश्चेति नाधिगच्छेदित्यर्थः। अप्रवेशे स्वस्याधिगमो न स्यादित्युक्त्वा प्रवेशे तु सोऽस्तीति प्रवेशफलमाह—**विपर्यये त्विति**। प्रविश्याभिव्याहृताद्युपलम्भे त्वित्यर्थः। वेदनरूपः संश्चेत्यधिगन्तव्योऽहं स्यामित्यन्वयः। वेदनरूपत्वमुपपादयति—**योऽयमिति**। योऽयं वागाद्यभिव्याहृतादि वेद स वेदनरूप इत्यधिगन्तव्यः स्यामित्यन्वयः। न च वेदितुः कथं वेदनरूपत्वमिति